CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 953 Subject: Vedānta

Title: Vedānta - A work on.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10·5" by 4·8" Extent: 50 foll.

Language: Sanskrit Script: Devanagari

Remarks: Begins & Ends abruptly.

॥ ॥ननुपदार्थाधिकामसहमानैर्वैशेषिकादिनयनवीनैः पदार्थखंडने मनोपि चासमवे
तेभूतमेव मनसः परसूक्ष्मत्वं त्र्यश्रुतिप्रसिद्धम त्रसरेणुरूपस्यासमवेतनूतस्यानुधाव
नंपुकं मनस्त्वं च हालग्राहकेंद्रियत्वा मनःपरत्वान्यत्वं वेत्ति न सि[ध्या]दिसिद्धि व्याघातः। ननै
वं युगपच्चाक्षुषरासनाद्युत्पत्तिः स्यात्। इंद्रियमनःसंयोगहेत्वंचितस्यावार्यत्वात्। भवन्म
तेपि च चक्षुरादिभिरेकदा मनोयोगस्यासत्वादिति चेन्न। अतिरिक्तमनोभ्युपगमेपि चक्षु
राद्येकतरेण मनःसंयोगोत्पत्तिं रदृष्टविशेषोपग्रहाद्वा। स चादृष्टविशेषैर्घटितत
त्कारणकलापविरोधि अदृष्टेन फलादर्शनिमविशेषोपग्रहः। तत्तत्कारणकलाप
विरोधित्वार्थप्यारणं वा। एवं च क्वचिद्बुद्धि। योगपद्यानुभवोपि निराबाधं पदमाद

धाति। इदं च ब[...]। आत्मादिग्रहे मन[...]स्तस्य सैनिकस्य च हठत्वे मानाभावान्मनःपदवा
च्यत्वमेव मनस्त्वमिहेति खंडितमतो या षोढा पंचधा चेत्युपक्रांतपक्षद्वयमध्योपंचभू
तमयं विश्वं तन्मयीलेसंदनर्घे तन्मयी मूलनि चेतिति प्रमाणालोकशालापंचधापक्ष
एव साधीयानिति प्रतीमः। मनसो निर्युक्तिकत्वादिति चेत्। सत्यं नहि तेराकाशं खे
उयित्वात् तदिंद्रियत्वमीश्वरमेव गमलद्धिर्मुनिप्रणीतं चानुरुद्धनिबंधव्यार
मावसरेतत्परिभाषयां मनो याकाशो वा तदिंद्रियं वा ऽन्यदपि[...]डितया व्याख्या
तं व्याख्यातं वा खंडनपरिभाषयेति नातस्तद्बुद्धिकौशलविभ्रमे प्रोक्तश्रुतिस्मृतिवि
षयमुपमध्यस्वसाहसेनातींद्रियविषपाण्यासवाक्यानि सामान्यदृष्टाविभावनिया

॥६

निधातायथा शिवः पूर्वमकल्पयदिति श्रुतेर्विपर्ययपहेज्जरतींद्रियदर्शी विश्वामित्रोप
न्यथासिद्धिं तिकेमी यौक्तिकाम्रनाद्यात् श्रुतिकमलकननपरिमललवास्तावन्मा
त्रदृश्वानो नातींद्रियवृत्तयः। अपि च पदार्थत्वावबमिति पांडित्यपरिभाषाया माग्र
हस्तदेकमेवाद्वितीयं ब्रह्मेति नेह नानास्ति किंचनेति लाघवं तं किमुत्सृष्टमपि च भूता
न्येव चेतयंते नास्ति परलोक इत्यादि लाघवं मिति चेत्। अस्तु श्रुतिस्मृतिविरोधाद
बालपंडितप्रतीतिविरोधाच्च सनोपि षट्पदार्थः। भूतले उमनस्कानाउत्तरं
भूतानामविवक्षितत्वात् सिद्धांतं एव व्याकुर्पातेत्य मस्माभिर्भवन्मतमभ्यु
पेतमतो मनसो ऽणुत्ववादिभिरपि मनसः परमाणतां वदंतः कथमधापि नतार्द्धि

कास्त्रपंते। कनकाचलजिलस्तनीनां तरुणीनामपि मत्र संनिवेश इति त्रपयाथवा
कविप्रजीवः स्वगृहे कथमी वयमिह स्थिताः। तादृक् लोकोत्तरं सा भूस्लेशैलास्लेदि
शोद्देशा कथं मम गृहे स्यात् यत्रामी वयमास्महे मत्त ऐरावणो बद्धो सार्षप कोणकोट
रे मशकानल्हतं युद्धं सिद्धो घेरण कोटरे। पञ्च स्थिस्थापितामेरुर्निगीर्णो मगस्तुना
ऋसंमंजसमेवैतद्यथेदं दादि वितादृशमिति प्रमाण त्यावानिः स्पर्शत्वाद्यभ्युपगमाद्वे
भवेउ स्वीकर्त्तव्यमिति चेत्। नाविभवाभावोत्थानानाद्ययौगपद्यात्। सति हि तस्मि
न् नानोत्पिधग्ना ह्यानामपि मह्रो युक्तिसिद्धः। हि त्रिच्छिन्नानां गृहगोधादिवपुषां क्रि
यासु तत्कूलं पूर्वोत्पन्नप्रयत्नवशादेवात्र पालो त्मनोन्यद्धि मु प्रतिपादयतामवय

स्तूर्वेशारीरावेभागोत्तरशरीरप्राप्तिहेतुकर्मणैवास्य संयोगविभागसिद्धेर्मनसोण
त्वमुपन्य मन्यथा तदसिद्धौ प्रेत्यभावानुपपत्तिः वक्ष्यमाणोक्तमनएवास्याएकाग
गमुदक्षा। नहि प्रज्ञापतेंशरीरं सुखं न दुःखं किंचन प्रज्ञापयेदन्यत्र मे मनोभूदिति
श्रुत्यादिप्रमाणविरोधइत्यणुत्व वैशेषिकादिनियोक्तमभ्युपगमो अपि चाविदोरेवम
नोरूपत्वान्। मनः स्थिनाद्धि मविवाद इति षिं हृदुर्धे दुर्धनादेरित्यप्रपंच तेत
स्मादणु मन इति तवापि सिद्धांतो ततः परमणत्वेतावद्दोडुंबरसमौ वशः कथं
। त्यवशिष्टंतत्सदृष्टांतं सप्रमाणं प्रदर्शयतइत्याशयवानाह। यंद्वदिति
। यद्वदितियेन तुल्यमपि दृष्टप थे मादिवदृष्टांतादोशक्ता। यथेत्यर्थः। न्यग्रोध

बीजात्मकतिर्थग्रोह इतिन्य ड्वान्यग्रोधः। न्यंकादित्वाद्गुत्वं। वटवृक्षः। न्यग्रोधो बहु
पाद्वट इति कोशः। तस्य बीजांव व्यज्यते ऽनेन बी हिनेरुक्तः॥ विशेषो ज्ञाय
ते। उपसर्गे च संज्ञायामिति उः। अन्येषामपीति दीर्घः। को घञ्मइदमचित्र
वृक्षो भोप्यस्यातिविस्तृतत्वात्। तस्य बीजमिति न हि सकलं फलं चिंदन्विशेषण धुपबृंहि
तः कश्चित ऋतः परमाणुविशेषो गमस्तद्धेतुभूत इत्यर्थः। इत्त्र्नोकारणं बीजमिति
कोशः। अत्र छंदोगश्रुतिः। न्यग्रोधफलमत आहरेतीदं ■ हि भगव इति भगव इति किमत्र
पश्य तीति किंचन भगव इति तच्च थुः प्रथलेचिर व्यातो भवतीति। कारथः। वटोपि
पिविख्यातः सोपं वटः श्याम इति सिद्ध इत्यादि प्रत्यभिज्ञा हेतुः। तत्राप्यतिशयतो ऽपी

यस्तपारव्याताः पृथुतराः। अविरासातिविरपाः स्वागकर्त्रनेन स्वावयविवृक्षारक्षंकैती
त्यर्थः। यत्कासः। स्कंधाद्गूर्ध्वं तरोः शारवा ततस्तु विटपो मत इति। शाखाविस्तार इत्यर्थ
॥ विस्तारो विटपोस्त्रियामिति कोशः। तेथस्य तथोक्तः॥ अनेसः शकटस्याकं मकिंद्धग
तेस्माद्धुसत्यागमनं इति न्यङ्कुलादिसंस्कमरित्यनोकहः॥ अनोकहः कटः शाल इति को
शः। स चासावनोकहश्चेति तस्य भावस्तत्वं तेन। रूढेरोह इति रूढं वृक्षत्वेन शास्वं
धशारवाविटपादिसंततमातिर्यगूर्ध्वमधोव्यासंसदित्यर्थः॥ स्वं एवोक्तश्रुतौ श्वेतके
तुर्नोनदृष्टं बीजभूतमित्यर्थः। सामर्थ्यं। दृशकालक्रियादिकारकचक्रसाकल्यसं
पत्तौ तादृशमहीरुहपरिणामं दर्शयेत्सा लोकोक्षोरयेत्। एन पूर्वं न दृष्टं त ध्याहारः॥

अत्र छंदोगश्रुतिः। तं होवाच वै सोम्यैतमणिमानं न लाभस एतस्य वै सोम्यैषोणित एवं महा
न्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति। इति हि परमशिवोक्तनिर्वचनं। तथा तद्वदित्यर्थः। स
त्याख्यविज्ञानबीजं वा चेन विज्ञिन्यासीत बकारं विद्यान्। तद्विज्ञानेन परिपश्यं
ति धीरा इत्यादिश्रुतिप्रसिद्धविज्ञानवंतत्वो धर्मरूपं ज्ञानाख्याशक्तिरित्यर्थः। तद्बी
जं यस्य तथोक्तः। सत्सशब्दो निरुक्तः सत्याख्यः सोपीत्यत्र ज्ञेयः सोबिंदुः सत्यं च तद्विज्ञानं
च तत्संबंधितोप्रवा बीजं चेति समासः। तच्च मनएवाइच्छेति। इच्छानित्र लक्षणो बहु
स्यामित्यादिश्रुतिप्रोदिता शत्रिचा। क्षेत्रं क्षीयते तदिति शाब्दिकाः। शरीरमित्यर्थः। त
था च स्मर्यते। इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयत इति। विश्वमपि क्षेत्रं। एतच्चरा

चरं सर्वक्षेत्रमित्यभिधीयते इति कुलार्णवोक्तेः। तत्र सर्वतः देशकालादिसाधनस
सहायं प्राप्येत्यर्थः। स्वक्रियाभिः। निरुक्तलक्षणबुद्धींद्रियप्रवर्तनरूपाभिः। सुबुद्धी
ति। सुष्ठु शोभनानि बुद्धीरिंद्रियाणि प्रत्यक्प्रवणतेवैषां शोभनत्वं इंद्रियमिंद्रलिं
गमिंद्र इत्यादिना निपातितं। तथा चेंद्रियाणामात्मलिंगत्वादिसिद्धिरिति भावः। कर्म
ड्रियाणामनवकाशा नेंद्रियग्रहणं। तेषां कुलं स तः। तान्येव कुलानि शक्तयो वा
।कुलं शक्तिः प्रकीर्तितेति प्रमाणात्। तथा चैंद्रियसंघातेन तत्कर्माभिर्वा कलितं। लां
७ भि गलपद्धतिरिव स्वस्वमर्यादयाययापयं ग्राह्यग्राहकग्रहणादिरूपतया समं विभक्त
मिवेत्यर्थः। अत्र प्रश्नश्रुतिः। अत्रैष देवः स्वप्ने महिमानमनुभवति यद्दृष्टं दृष्टमनुपश्य

ति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगंतरैश्च प्रत्यनुभूतं पुनःपुनः प्रत्यनुभवति दृष्टंचा
दृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यतीति। सुबु
द्धींद्रियकुलकलितेइति उयुक्तो। रद्रि पाणिंद्रियानाकू रिति कठवल्लीकरीत्यातः पश्य
कुलैः कलितः इष्टेइ छाक्षेत्रेइत्यर्थः। एवं च आत्मानं रथिनं विद्धि शरीरं रथमेव चा
विज्ञानस्य सारथिर्यस्य मनः प्रग्रहः एवं चेति तस्य पक्रमोपि संगच्छते। तथा च तथो
क्तलक्षणेनात्मानं सत्यविज्ञानविजानस्यमुक्तलक्षणं विश्वरूपं पापादेस्य सर्वो
भूतानि। आराइव रथनाभौ प्राणे सर्वं प्रतिष्ठितमिति। तथा रथस्यारेषु नेमिरर्पि

तो नाभावराअर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पि
ताइति द्विश्रुतिनि तमित्यर्थः। तथोक्तं यदा यस्मिन् काले देश कालक्रियोपबृंहित
। प्रकरभाति। यस्मिन्काले विश्वाकारेण परिणमतइत्यर्थः। तदा तस्मिन् काले लिंगोच
रः कार्यलिंगसाध्यानुमितिविषय इत्यर्थः। स्याभवसि। प्राप्तकालेनलिंडू। प्राप्तकाल
श्च निमित्तकालावसर इत्यर्थः। आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति। स एं
ष प्राणश्च प्रज्ञात्मानंदोऽजरोऽमृत इ भोक्ता श्रुतिचोदितकारेण प्रतीतिविषयो भव
सीत्यर्थः। अत्र तितिकठकौषीतकिमुख्यश्रुतिः। स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स
आत्मा तत्त्वमसि श्वेतकेतो इति। योगवासिष्ठेपि। यथांऽतर्जले बहीसर्वोर्मिदं

तथात्मनि। फलपुष्पलतापत्रशाखाविटपमूलवान्। वृक्षश्बीजे यथा वृक्षस्त
थेदं ब्रह्मणि स्थितमिति तस्य सत्तावभासस्य चिद्व्योम्नः कोशकोटरे परमाणोप
रमाणौ परमाणौ संति यत्से चिदात्मनि। अंतरं तर्जगंती ह प्रतिभासात्मकान्युतति
च। अलंकारस्तु। उदात्तं अकारणात्स्वात्मप्रकटनात्। गोचरस्तु भवनरूपकार्योत्तते
र्विभावनापि। तल्लक्षणं तु। अकारणात्कार्यजन्म दृष्टा काचिद्विभावनेति। कार्योत्कं
रणजन्मरूपा विभावनापि कार्यस्य कारणतया तत्रैव निविष्टेति त्वन्यदेतत्॥
॥४४॥ ननु त्वसूक्ष्मं विश्वात्मकं च मनो यदि तदेकमेवाभ्युपगंतव्यमिति नियमः
स्यात्तैत्तिरीयादौ पंचभूतानि कप्रश्नोपनिषदादौ दृश्यप्रपंचः सिद्धांतादौ नादाद

दयः कौथुमश्रुत्यादौ वान्यादयश्चेति तदभावाद्दैतविप्रतिपत्तिरिति चेन्न स्वात्मन एवैक
स्यैष विश्वात्मकतापरिणाम इत्याह॥ स्वात्मैवेति। एष इदंतास्पदं स्वः अनेन स्वात्मनैन एवै
षविश्वात्मजंभोनात्मकर्तृत्वेनान्योऽस्तीत्युच्यते। आत्मैव स्वस्ताश्रयो रूममेदमित्यादि
प्रत्ययवानित्यर्थः। अत्र श्रुतिः। आत्मैवेदमग्र आसीत्। आत्मेत्येवोपासीतेत्यादिः। आत्मा
न्माख्यातः। एवकारेणात्मेतरस्य प्रवृत्तियोगो व्यवच्छिद्यते। आत्मैवैषः स्वकीय इत्यत्र
निरुक्तो नान्य इत्यर्थः। ननु यत्तददृश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपाद
मि। त्यं विभुं सर्वगतं सुसूक्ष्ममिति श्रुतिविरोधात्तस्य प्रवृत्तिसंभव इति चेत्॥४५॥ ए
व्ययं यद्भूतयोनिं परिपश्यंति धीरा इति। यथोर्णनाभिः सृजते गृह्णते चेति। यथा पृथि

व्यामोषध्ययसंभवेति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीति॥ हविश्च
मिति श्रुतपरः स्थिता एव पूर्वाप्रबन्धारपतालयाकिंनोवा रितार्इत्याशयेनाह। अक्ष
वृत्तेरिति। अदृष्टवंतस्यक्षाणि। व्याप्तिसंहतिया चकाद्दृष्टलुतेः पंचाधचिन्युत्पन्नानां
द्रियाणि। अभाक्षमिंद्रिये। नाधूतांगे कर्षचक्रे व्यवहारे कलिद्रुमइतिकेशः। श्रोत्रादी
नि तेषां वृत्तिः स्वस्वगोचरविहरणलक्षणव्यापारलक्षणतस्याः। एथगयनत
या। एथक्कृतदितरानिरपेक्षमित्यर्थः। अयनेवर्त्म। यस्याः। अयनेवर्त्ममार्गाध्वेतिको
शः। तत्तया। तत्वेनेहेत्रना अतएव वृत्तेरित्येकेवचनं। आत्ममनःसंयोगस्यतत्र हेति
निर्यमिकत्वादित्यर्थः। एवंचात्ममनःसंयोगस्यानिपंचत्वाभ्युपगमेतत्रत्सहकारि

ष्टंहिततत्वदिंद्रियवृत्तिसामान्यात्तदुपपद्यताएकाशातेजसोवारिणोनिष्पादनलाहुभूमे
जायमानाः कादाचित्की प्रमाणतात्पर्यपर्यालोचनमूलाः सरणयोपिसंगताः स्युरिति
भावाः। कापीति। तैत्तिरीयेरि ब्राह्मणादौ। पंचभूतानिवियदादीनि। तथाच श्रु
तिः। आकाशाद्वायुर्वायोरग्निरिति। छंदोगश्रुतौ। प्रणइति होवाच सर्वाणिह वा आपएवेदम
ग्नआसुः। अन्नंब्रह्मेतेकआहइत्यादिश्रुतिभिरुपोद्बृंहितं। आकाशस्तल्लिंगात्। प्राणः।
ज्योतिश्चरणाद्दर्शन त्यादिसूत्रैमयोर्द्वीर्लततत्र भूताउंबरस्यैवजगदाडंबररू
पत्वमंदधीरोभिकलितंभूतानामवचेतयिच्छलेसोगततदपिसएवेति भावः। तडक्तं
चिज्जगामलविडिकायां। ज्ञायमानमचिदचिद्रसात्मकं भावद्दमाधिरुह्यमायया: स्वानि

लाग्निजलभूमिजासिनीशंभुतः प्रभृति भासते शिवेइति। तदुरत्रासस्यायुक्तयस्यमाल
री त्याशक्तिमयत्वात्। तदुक्तं पंचभूतमयं विश्वं तन्मयी त्वं सदानुरक्ति। यद्वास्मिन्नर्थे पूर्ववि वे २
प्रतिपत्तिः। सा चोक्तकापीति छंदोगपादो। प्रेक्षणं प्रेक्षो दर्शनं चिकार्थादीक्षतेर्भावव्यु
सत्या गुरोश्चहलइति प्रत्यये सिद्धा। स तत एव वीक्षणं। स्वच्छस्वालकर्ता कनं वात दर्थः। अत्र
श्रुतिः सदेव सोम्येदमग्र आसीदीति प्रस्तुत्य तदैक्षतेति। ऐतरेयश्रुतावपि। आत्मा वा इद
मेक एवाग्र आसीदिति। प्रस्तुत्य स ईक्षत लोकान्नु सृजा इति। सेवतया वाकरणेन प्रपंचः। प्रकृ
ष्टं पंचतीति विस्तरसीति विस्तरार्थासंच व्युत्पन्नः संसार इत्यर्थः। अत्र छंदोगश्रुतिः। बहुस्यां
प्रजायेयेति तत्तेजोसृजतेति। द्वितीयार्थे पि। तस्याभितमस्य मुखं निरभिद्यत तयांडं मु

खाद्वाग्वाचोग्निरित्यादिः। रेतो भूत्वा शिश्नं प्राविशं स्तमशनापिपासे अब्रूतामित्यंतैत
रेष एव। यद्वा। य एषोंतरादित्ये पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व
एव सुवर्णस्तस्य कप्यासं पुंडरिकमेवमक्षिणीति। य एषोंतरक्षिणि पुरुषो दृश्यते स आत्मे
ति होवाचैतदमृतमभयमेतद्ब्रह्मेति च छंदोगश्रुत्युक्तक्रमेण प्रेक्षाया प्रपंचो दृश्यता
लक्षणो विस्तारो यस्येत्यर्थः। श्रीमद्भिर्दृश्यमावेहे रेमहामिदमित्यात्मजं भैरित्यु
क्त्या दृश्यमपि स एवेति भावः। क्वचेति। चकारोप्यत्रापि वाच्यसंभावनार्थः। क्वापी
त्यर्थः। आथर्वणदो निनदमुखाः। निनदः शब्दः शब्दो निनादो निनद इति कोशः। आ
हतानाहतभेदाद्द्वेधापि शब्दस्य नितरां नदतीति व्युत्पत्त्या अनाहत एव निनदः। इत

रस्य तु मारुतश्चोरसि चरन्मंद्रं जनयति स्वरमिति श्रुत्या सावयवत्वज्ञापनात्। विद्
गगनचंद्रिकायां। यस्त्वनाहततोद्भुरः प्रउ स्वयं स्वमूलगगनोच्छ्रितोऽस्वरः। तत्रर्दो विविधे
दग्रपार्श्वयुक्ता। मध्यमा वहसि पंचधाक्रमात् इति। सः मुखमाद्यर्थे पातथोक्तः। कोऽर्थः। अं
बधामकरणप्रयत्नजो वैखरः स्फुरति पाठ्व्याहतः। मानसः पुनस्त्वसावनाहतो भासित
स्त्वुपलब्ध्युत्तर इति चिद्गगनचंद्रिकोक्तेरनाहतो मानसः। आहतोऽपि ध्वन्यात्मको व
र्णात्मक इति द्विधेति मध्यमानिरूपणावसरे नवनादमयी सूक्ष्मेत्युपन्यस्तं। तत्राना
हतो यदेष कर्णावपिधाय ग्नेरिव ज्वलतो रथस्येव गच्छत इति श्रुतिः कौषीतकिब्राह्म
णस्थ कर्णलज्ञानोपयोगिनी नाशंक्याते हि स नादः श्रुतो घोष इति तस्य पारिभाषि

कत्वात्। तथा च वाजसनेयश्रुतिः। अयमग्निर्वैश्वानरः योयमंतः पुरुषे येनेदमन्नं प
च्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्र
मिष्यन् भवति नैतं घोषं शृणोतीति। तस्याग्निमरुभ्यामुत्क्रमणाहतत्वात्। यद्वा मु
खस्योद्देशलक्षितत्वादादित्राद्या ध्वनिवर्णात्मको नादः। यद्वा पंचाशद्वर्णमाला बहु
विधनिनदोच्चारणादित्यत्र विवक्षितास्तत्तत्स्थानप्रयत्नवैलक्षण्यादाप्यास्वस
तादात्म्यविचित्रा नादः यद्वा तुरीयं तद्धाम ध्वनिभिरवरुंधानमेकमेनिरितानयवा
नामचवर्यवत्युपचारात् नादस्यार्धकलानादांतशक्तिव्यापिकासमनोन्मनाः इति
तस्यावयवाः। वाक्यपादयश्चेत्यत्र वृत्तानुराधाद्वाक्यशब्दप्रयोगेऽपि श्रुत्यनुरोधे

नवर्णादिक्रमस्येवविवक्षितत्वात्।वैखरत्वेनमात्रकास्कंधरश्मिभाविवेचनेवर्णानां
प्राधान्याद्वर्णादयश्चेतिन्येक्षापीति।वाक्यादयश्चैवक्रमं वा।वंसंतदादिएषां।वामुं
उपनिषदुक्तमापरारूपमृग्वेदादि।कौथुमीश्रुतिरपि।वाग्वैनाम्नोभूयसी।वाग्वाऋ
ग्वेदंविज्ञापयतियजुर्वेदंसामवेदमथर्ववेदंचतुर्थमितिहासपुराणंपंचमंवेदानां
वेदंपित्र्यंराशिंदैवंनिधिंवाकोवाक्यमेकयनंदेवविद्यांभूतविद्यांक्षत्रविद्यांसर्प
जनदेव।विद्यांदिवंचपृथिवींचवायुंचाकाशंचापश्चतेजश्चदेवांश्चमनुष्यांश्चप
शूंश्चवयांचतृणवानस्पतीञ्छ्वापदान्याकीटपतंगपिपीलिकंधर्मंचाधर्मंचसत्यं
चानृतंसाधुचासाधुचहृदयज्ञंचाहृदयंचयद्वैवा मनभविष्यन्नसत्यंनानृतंन

साधुनासाधुनहृदयज्ञोनाहृदयज्ञोवबैतत्सर्वंविज्ञापयतिवाचमुपास्स्वेतिसयोवाचं
ब्रह्मेत्युपास्तइति।कमल्वापेक्षिकरत्यवोचामएतैरेव।पंचभूतादिभिरेव।एवंका
रेणपंचभूतादीतरयोगेनव्यवच्छिद्यतेकिंउद्दवस्यैतदादिनिर्विनास्वतःकेवल
स्यप्रवृत्तियोगोव्यवच्छिद्यतेइतरेषामपिविवक्षितत्वात्।निजविषयतयानिजाः
नित्यावाल्मीर्यःविषयागोचराअर्थाइत्यर्थःतत्रज्ञातत्वेन।विषयितासंबंधेनग्रा
ह्यग्राहकग्रहणतपेत्यर्थः।सर्वविश्वात्मजंभः।सर्वंसकलंविश्वंतस्यात्मानिस्वस्व
पेजंभाप्रकाशस्फूर्तिविशेषायस्यतथोक्तः।प्रवृत्तः।पंचभूतादिभिःसकलजग
दाउंबरलक्षणरश्मिचक्रोद्दीपइत्यर्थः।एवंयतस्तस्माद्धेतोः।त्वंसुतोकवीनां

समरे भटानां। लंकारयुक्ता हि गिरः प्रशस्तेत्या- मापा ऋजनार्थं युषे सौत्रात् ऋजनीय
वाचकतया सिद्धो युष छ ष्टुः। एकवचनं अद्वितीयस्य तादृशस्य सर्वणीयस्योत्तव
ष्यमाणक्रमेण संभवादिति भावः। ततस्तमेव विभावनीयो नाचर इत्यर्थः। एवंक
तः। यतो लोकमुख्यः लोक्यत इति व्युत्पत्त्या लोकश्चासौ मुख्यश्चेति कर्मधारयः। ए
के मुख्यान्यकेवलाइ इति कोशः। स्वप्रकाशरूप एक एवासिन्न द्वितीयः। लोकात्तेऽनने
ति करणव्युत्पत्त्या तु लोकाः पंचभूतादयो निरुक्तप्रपंचत्वो याधिकास्तेषु मुख्य एकः।
अप्र प्रश्नश्रुतिः। एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः
सदसच्चामृतं च यत्। अराइव रथनाभौ प्राणे संप्रतिष्ठितं। ऋचो यजूंषि सामानि यज्ञः

क्षत्रं ब्रह्म चेत्यादिः। श्वेताश्वतरश्रुतिरपि। स एको जालवानीशत ईशनीभिरिति। य एक
इद्रूवे संभवे चेति। एको हि रुद्रो न द्वितीयाय तस्थुरिति। अथर्वशिरोऽपि। एको रुद्रो
न द्वितीयो वतस्थे इति। ऐतरेयश्रुतिरपि। तमशनापिपासे अब्रूतामावाभ्यामभिप्र
जानीहीति ते अब्रवीदेताभ्य एव वां देवताभ्य आभजाम्येतासु भागिन्यौ करोमीति तस्मा
द्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवत इति क्रमे
णनियंतृतया लोकमुख्य इत्यर्थः। कौषीतकिश्रुतिरपि। प्रज्ञात्मानं निरूप्य एष लो
कपाल एष लोकाधिपतिरेष लोकेशः स म आत्मेति विद्यात् स म आत्मेति विद्यादि
ति। अत एवाद्वयमितिरहितः। अद्वयं द्वैतमितिमितः प्रमानुपमित्वात्प्रमाणसिद्ध

द्वैतबुद्धिजननी तया रहितस्तत्त्वो वर्जितः। तत्साक्षात्कारेऽनुमित्यादयो निरवकाशा
इत्यर्थः॥ द्वयमस्तीति पाठः॥ द्वैतबुद्ध्या रहितः। नहि द्वैतपरामर्शो भवतदुदासीन
स्येति लोकमुख्यत्वमर्थसिद्धमेवेति भावः॥ प्रक्रियाउ प्रमाविषये वास्तीति पूर्वपाठए
वयुक्तः॥ नन्वप्रमासाध्येव स्फनिकथं लोकमुख्यतेति चेत्। न। नहि परतः प्रामाण्यम
भ्युपगच्छामः किंतु स्वतः प्रामाण्यमित्याह। स्वप्रकाशप्रमेय इति। स्वत्र आत्मीयः प्रकाश
स्तस्य भासा सर्वमिदं विभातीति श्रुतिप्रतिपादितो निरुक्तरूपस्तेन प्रमेयव भा
वर्णनीयः। वक्ष्यमाणचित्सुखाविषयीकरणीयत्वमेव साक्षादनुभूयसे योगीरिति
त्यर्थः। तदुक्तं प्रमाणं॥ अथवा त्मैककतानानां प्रतिरेवात्र साक्षिणी नहि वैकर्तनं ज्यो

तिर्दीपालोकमपेक्षत इति रीत्या अभ्युत्पन्नमनापावद्भवानज्ञाततत्त्वदः। गरुशास्त्र
प्रमाणैस्त्वनिर्णीतं तावदाचरेति प्रमाणोक्तेर्व्युत्पन्नमनसामेव प्रमाणाद्युपयो
ग इति भावः॥ अलंकारस्तु उदात्तं प्रकृतं। पूर्वार्धे एकस्य बहुभिर्बहुधोल्लेखादुल्ले
खेपि। तल्लक्षणं त्रु। बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यत इति। तृतीयपादे एतै
रेव प्रवृत्तर इविषद्गणैर्विषपानात्क्रियार्थत्वात्परिणामोपि। वाक्यार्थहेतुकं काव्य
लिंगमपि। त्वमिति विशेष्यसाभिप्रायत्वे परिकरांकुरेपि। विशेषणद्वयसाभि
प्रायत्वे परिकरोपि॥ ७५॥ ननु कालः सृजति भूतानि कालः संहरति प्रजा इति। कै
लः कवलिताशेषविश्वाविश्वात्मतां गत इत्यादि प्रमाणेभ्यः कालोपि सन्निति श्रु

यते। इमाइदशइत्यादिश्रुतेर्दिशामपि सत्ता। अंतरिक्षोदरः कोशो भूमिर्बुध्नो न जीर्यति
प्राणस्य का गतिरन्नमिति श्रुतेः पृथिव्यापि सत्ता। अन्नस्य का गतिराप इत्यपामपि स
त्वं। अथ यदतः परो दिवो ज्योतिर्दीप्यत इति तेजसोपि सद्रूपत्वं। प्राण इति होवाच
सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहत इति वायो
रपि सत्त्वं। एवं च कं ब्रह्म खं ब्रह्मेति सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्प
द्यंते आकाशं प्रत्यस्तं यांतीत्याकाशस्यापि सत्ता। अपि च तत्त्वमंत्रबीजान्यपि वक्ष्यमा
णरीत्या संत्येवेति न सदेकमेवेति नियमः। अस्तु नतेषां कालादीनामपि भूतमपि
ष्यादिविधाभिरनेकता बीजानामपि तत्त्वमंत्रमूलवर्णत्वादानंत्यमिति य

ब्रह्मसत्त्वऊयर्तीत्येमूलक एवायमनुपन्यासः शरद्दह अभ्रसंभ्रमाविभ्रमवइ
पेक्ष्य इति चेत्। नातत्सत्येवैतेषां सत्त्वाभ्रम इत्याह। कालः इति कलयति जगदे
षकालोत इति निरुक्त्या स्वचिरयोर्ज्येष्ठत्वकनिष्ठत्वरूपे परापरत्वे एकं कालता
नेककालतौ नेककालतेदीर्घकालतास्यकालते। तस्यानुमितौ लिंगानि। स्वस्व
विषयेषु घटादिषु युगपद्भवनयुगपत्ऊमनयुगपत्करणयुगपद्वर्तनादीनां उ
त्पादप्रत्ययविलक्षणानामेषामुत्पत्तौ चेतरनिमित्तासंभावाद्यन्निमित्तं स कालः
पूर्वकार्योत्पत्तिविनाशनिमित्तं तस्मादेव व्यपदेशात् क्षणादिप्रलयांत व्यवहार
हेतुः लिंगाविशेषाद् कोपि प्रजति घटो जायते जनिष्यतीत्यादौ धर्मुत्याद कोन

नुगुणव्यापारस्थितिरतीतत्वं। अस्यात्मा वर्त्तते घट इति। इष्टिर्भिस्त्रैव वर्त्तमानता। धार्मिणः
प्रागभावसत्ता भविष्यत्ता घटो न ष्ट इत्यादौ स्वरूपनिवृत्तिरेवातीतत्वं तदुपलक्षितका
लस्याप्रतीतत्वादिकं स्फटिकारौजपाकुसुमाद्युपरागोपाधिवत्। त्रगुणरागिणमणिजनि
तपवकवत्। तस्यावस्थाः। दशावस्थानेकविधेति कोशः। तैर्तैर्दिक्चतुर्युगीत्यर्थः। पूर्वोक्त
रीत्या। येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वं इशाने भूतभव्यस्येति श्रुति
रीत्या निरवस्थत्वमेव संलक्ष्यते यामकइत्यर्थः। तदुक्तंमाहा। कविभिः। चतुर्वर्गफलं ज्ञा
नं कालावस्थाश्चतुर्युगा। चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखादिति। दशदिश इति।
अस्मादिदं पूर्वेणेत्यादिदेशप्रत्ययलिंगा मूर्त्तद्रव्यावधिदेशिनी तरनिमित्ता संभ

वात्। दिग्लिंगाविशेषादंजसैकादिक्। प्रथममंचत्यस्याः प्राच्येवं प्रतीपमंचतिप्र
तीची उदगंचत्युदीची पवागंचत्यवाची एवं प्राच्यवाची। अकाक्। प्रथममंचत्य
स्याः प्राच्येवं तीची प्रत्यगुदीची उदक् प्राचीति सूर्यापेक्षया। धः पृथिव्यपेक्षयायत्र
नक्षत्राणि सोध्वेति महामुनिभिर्मेरुं प्रदक्षिणं यतो मार्त्तंडस्य संयोगविशेषेणैव
लोकपालगृहीतानां प्रदेशानामन्वार्थसंज्ञाकृता भत्या दशदेवतापरिग्रहा
च्चप्राहैंद्र्यादिसंज्ञाअपीति सा चैकाप्यन्यथानुपपत्त्या दशधा स्वीकृता सा लब्धसत्ता
बीजानुभवत्यर्थः। अत्र मुंडकश्रुतिः। ब्रह्मैवेदं प्रथमं पुरस्तात्पश्चाद्ब्रह्म दक्षिणतश्चो
त्तरेण अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति। सप्तधा भूमिः सप्तप्रक

राभूरादिसप्तलोकमयत्वात्। रसातलादीनां उत तलतया निर्देशात् तत्संबंधेन भूर्लो
क एव। भूरादयः सप्त तांताः सप्तभूमयो गायत्र्यः स्थाः प्रसिद्धाः॥ सप्तेति संभवान्निर्देशस्त
न वसुंधरागुणोगंधस्तल्लिपिर्गंधवान्चिका। भुवनत्रयसंबंधात्त्रिविधा उमरेश्वरीति
योगिनीहृदये त्रिधा संकेतसापेक्षत्वात्त्रिधा पुरुकैवं चतुर्दशधोपयोगिनां तत्वादिसंक
लनया चतुर्दशधापि संभवतीति नानात्वस्यापेक्षितत्वादेकैवलस्तत्तया सतीत्यव
९ त अत एव सप्तधेति प्रकारवचनो निर्देशः। आपइति बहुवचनात् जलानां मानं त्यंततत्तद्देश
संपर्कात्भिप्रायपरं। संबंधो विदितो लोके रसस्याप्यमृतस्य चेत्युत्तर चतुःशत्युक्तरीत्या
पीयूषं पयश्चेति द्विधापि। तदुक्तं महाकविभिः। रसांतराण्येकरसं यथा दिव्यं पयोश्नुते।

देशे देशे गुणेष्वेवमवस्थास्त्वविक्रियाः इति। एवं चापां प्रकारतामानमपित्वा। सत्ता वेद्य
मित्यर्थः। नानातेजः अग्न्यादिमंडलत्रयं ग्रहाः नक्षत्राणि तारकाश्चान्येवेतदाद्यग
म्यभासकाः स्वपंप्रभाश्चेति नानातेजांसि। न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्यु
तो भांति कुतोयमग्निः। तं हि भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुं
उश्रुत्या विश्वमावगतानां नामज्योतिषामापेक्षिकत्वमेकमेव चैतन्यं सदवभास
कमिति तन्नानात्वमित्यर्थः। समीराः सम्यगीरयंतीति। वायवो दश। प्राणापानासमा
नोदानव्यानाः इति पंचभौतिकसंघातवाहा वाह्याः पंचांतरा नागकूर्मकृकरदेवद
त्तधनंजयाख्याः पातंजलोक्तमानसक्रियोपयुक्ता इति दश। नेयं संख्यानियतपरि

छेदवाचिनी सर्वत्र स्थूलतया प्रतीत्यवच्छिनी। संभवति। तदुक्तं तंत्रे वा प्राणापानय
मानोदान नाः पंचाशितविभक्तिहेतव इति। नागाद्याः तरापयुक्ता इति। हठप्रदी
पिकायामपि। नागः कूर्मश्च कृकरो देवदत्तो धनंजयः॥ प्राणोपानः समानश्चोदान
व्यानौ च वायव इति। उत्तरचतुःशत्यामपि। प्राणादि षोडशानां च प्राणनाश्राणना
त्मिकाः षोडशस्पंदसंदोहचमत्कृतिमयीः कलाः॥ बीजभूतस्वरात्मत्वात कलना
रूपबीजगाः॥ अंतरंगतया नित्यं योगिन्यः संस्थिता इमा इति। पंचैवं प्राणाद्याः पंचना
गाद्याः पंचतंत्रांतरप्रसिद्धाः षोडशी कलेति षोडशेतित व्याख्यातारः॥ लिंगपुराणे
ऽपि। प्राणाद्या नागकूर्माद्याश्चावहाद्याश्च वायव इति। ते चावह निवह संवह प्रतिवहा

नुवहाख्याः पंचेंद्रियप्रवृत्तिप्रयोजका मनस एकैंतराः क्रियाविशेषा इति स्वात्मवि
नोददर्पणे वैरमणस्थानमुख्यप्रयोतकृतकाख्याश्च त्वारोऽन्यैः स्वीक्रियंत इति पंचा
र्थादृशकृतः॥ तत्र मूलं नोक्तं वियदखिलव्यापि वि। विश्वत एत्ते गम प्रोक्तीतीति शत्रं
तस्येणो व्युत्पत्त्या सिद्धं चास्य विभुत्वं। वियदाकाशः॥ व्यक्तव्या वादपरजात्ससिद्ध
राकाशः कालादिगिति पारिभाषिकाः संज्ञाः॥ आलोकाभ्यं श्रादवेहशाकुंतोनेहनक्ष
त्रमित्यादिव्यवहारः॥ तद्गुणश्च शब्दः स च वैशेषिकादिनयोक्तः॥ आकाशं शब्द तन्मा
त्राद्भिर्ते शब्द गुणं महत इति स्वच्छंदसंग्रहोक्तरीत्याच पारिशेष्यत्तद्विशेषगुणे
लिंगं तदधिगमस्य आखिलं महद्व्याप्तातितयः क्वनाह पारामतस्य सकलदेशसंयो

गः संभवतीति विभिन्वित्यर्थः। तथाह्यनुमितिः वियत्त्वाविभुत्वस्पर्शशून्यत्वे सति प्रत्यक्षगु
णाश्रयत्वादात्मवदिति। अन्यथा परिमितत्वे प्रत्यक्षगुणाश्रयत्वासंभवात् अवयवि
त्वे स्पर्शशून्यत्वविरोधादिति भावः। एकमिति। नह्याकाशो द्वितीयं श्रुतः। आकाशको
ऽदिशस्त्रीणि मरुदाकाशौ द्वौ भूमिसलिलानलानिलार्केशाः पंचभूम्याकाशाद
पश्चत्वार इत्याकाशे संख्याव्यवहारे निराबाधेपि शब्दाश्रयस्य स्यानेकत्ववारणा
यैकमित्युक्तं तथा च सर्वेषां वा एतद्भूतानामाकाशादिपरायणं सर्वाणि ह वा इमानि
भूतान्याकाशाज्जायते तस्मादेव जातानि जीवंति तस्मादाकाशं बीजं विद्यात् तदेवार्के
शं पीठं शाश्वसनं पिठमंतः पीठममृतपीठं रत्नपीठं ज्यौत्स्नीयादिभिः सुंदरीतापिनी

योक्तरित्यात्तवपीठतया सत्वविभुत्वमेकत्वं चाक्तमिति भावः। इतीति शेषः। इति प्रका
रेण बीजत्वेन निर्दिष्टोऽनेकधेव प्रतीयमान इत्यर्थः। दशाभिरनैकरवस्थाविशेषैः
भिन्नार्थानंतभेदः भिन्नः स्वतंत्रः अर्थः विषयः प्रयोजनं वा येषां तथोक्तानंताभेदा यस्य
तथोक्तः। कोऽर्थः। कालादीनां निरुक्तमनेकत्वं सप्रयोजनमग्रे वक्ष्यते च। सचतेत
वा महिमा महत्ता भावः महत्वं। छंदोगश्रुतावस्ति भगवन्तो भूय इति नारद एति
सनत्कुमारेण नामादिप्राणांते तत्त्वं देउपदिष्टे प्राणस्योपरि विना प्रश्नमवता
रितो यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति तत्र भूमा बहुत्व
सोदशाभिर्न सत्वाविर्भावितइत्यर्थः। भिन्नार्थानंतभेदप्रकारैर्महिमेति पाठे उ

ताद्दशद्दशाविशेषविजृंभणोल्लासितत्वाद्दशानंतभेदैः प्रकटितोयं तत्वमहिमा
२ न्य भूमेत्यैर्थः ॥ अत्र समानेपि बीजभेदोस्त्विति । तुल्य देवधारणेदति कोशाद्विभक्तान्वयः
॥ तथा चानंताः अप्रमेयाः । बीजशब्दो निरुक्तलक्षणोत्र मंत्रबीजानि लक्षयति
। मायाबीजं ताराबीजं श्रीबीजं पराबीजं कालीबीजं गणपतिबीजमित्यादि
नानातंत्रनिर्दिष्टनानादेवताकनानामंत्रबीजानि । तेषामापन्नसत्क्रियाविशेषज
नकत्वात् । यद्वा अथ विशब्ददपि बिंदोर्गगनानिलवह्निवारिभूमिजनिः । एत
त्वं च कविकृतिर्जगद्दिदमण्वाघजांडपर्यंतमिति पुण्यानंदमुनीश्वरोक्तरीत्या
सितबिंदुविकृतिवाचकानि निरुक्तथोपंचभूतगणबिंदुस्फुरितनादांकुरोल्लसि

तानि तत्तद्भूतबीजानि । तेषां क्रियाजनकत्वान्नान्येव । तदुक्तं भूतचिंतायां । यथाविरे
कं कुर्वंति इरितक्यादयः क्रमात् । भावनावशतः कार्यं तथा परलवाद्य इति ड्रा।
वक्ष्यमाणोक्तरीत्या यथा यथा भूतानामेकादशधा । षोडशधा । चतुर्विंशतिप्रकारैः
षट्त्रिंशत्प्रकारैः प्रसरस्तथा तथा वाच्यविक्षत्या वाचकसंबंधाद्भूतलिपिक्रमेणैव
र्णविसर्गरोपितिसकलमंत्रबीजभूतानि मातृकाक्षराण्येव बीजानि । अत एव पूर्वे
सत्यपि प्रोक्तछंदोगश्रुतिक्रमे तं विहाय यत्वाक्यादयश्चेति वाक्यादिक्रमोप्यत्र चेतद्वत्तव
धेयं । तथा च तेषां द्विधेयं मातृकादेवीबीजयोः मोमनास्थिते । परापंचाशिको
क्ताबीजतयाभेदः सकलवाङ्मयाकाराः । तदुक्तं बीजयोनिविधिभेददर्शिनी

मात्मकानुकृतिमात्रलक्षणेति। ननु किमाद्यातंतायते त्यत्राह। तत्सत्ता बीजजाताइति
। तत्र निरुक्तलक्षणस्य सत्ता। सामान्यं वैशेषिकादिनयोक्तं परमपरामिति द्विविधं।
तत्र द्रव्यगुणकर्मवृत्तिः सापरेति। ततोन्याऽपरेति सत्तैव तु द्विरूपे तत्र सत्ताया
एकं नानाकृतिस्थितं द्वितीयमेकरूपं त्वविभागोयं तयोः श्लृ। घटता पटता लत्ता
सत्ता सत्तेति कथ्यते। सत्तारूपं विभागेन यच्चान्या नाकृतिस्थिते। विशेषं संपरित्यज्य सन्मात्रं
यदलेपकं। एकरूपं महारूपं सत्तायास्तत्पदं विदुः। कालसत्ता कलासत्ता वस्तुसत्तेयमि
त्यपि। विभागकलनात्यक्तो सन्मात्रैकपरो भव। कालसत्ता स्वसत्ता च मोन्मुक्तकलनास
ती। यद्यप्युत्तमसद्रूपा तथाप्येषा न वास्तवी। विभागकलनायत्त्वविभिन्नपददायिनी। ना

नाताकारणं दृष्ट्वा तत्कथं पावनं भवेत्। सत्तासामान्यमेवैकं भावनयं न केवलं वपुः परि
पूर्णः परानंदी मुक्तस्तिष्ठति योगिराडिति विज्ञानगीतोक्ता सामान्यसत्ता। तस्याः बीजं सं
केजो। तदुक्तं तत्रैवासत्त्वसामान्यमात्रस्य या कोटिः कोविदेश्वर। स्यैवास्मबीजतां याताता
त एतत्प्रवर्त्ततऽइति। योगवासिष्ठेपि अथास्याः संविदो राम सन्मात्रं बीजमुच्यते। सन्मात्रा
द्युदेत्येषा प्राकाश्यमिव तेजसेति। ततः जाता प्रादुर्भूताः। तयैवेते भावाः प्रकाश्यतइ
त्यर्थः। अत्र श्रुतिः। सदेव सोम्येदमग्रआसीदिति। आत्मैवेदमग्रआसीदित्यादिश्चान
नु चैते स्व स्व विशेषगुणएव भेदकतया प्रकाशकोस्तु ईतेतर प्रसिद्धः। किं मनेन स
न्मात्रलोपिच पृथिव्यादितत्तद्द्रव्येषु गंधादिनतद्गुणसमवायस्य रपलपलो

दित्याशंक्याह। खगुणमिति। तेचा। चकारोगर्हासमुच्चयप्रश्नेतिकोशात्। ऊर्हवाचीति। तत
वा। त्वसंबंधिषुसत्स्वपि। आर्द्रैधाग्नेरभ्याहितस्यपृथग्धूमाविनिश्चरंत्येवंयावा अरेऽस्य
महतोभूतस्यनिःश्वसितमेतद्यदृग्वेदोयजुर्वेदःसामवेदोथर्वेनाद्विव्याख्यानानि
दत्तंहुतमाशितंपायितमयंचलोकःपरश्चलोकःसर्वाणिचभूतान्यस्यैवनिश्वसिता
नीतिश्रुत्याऽप्रयत्नेननित्यासिद्धा इत्यर्थः। वेदयंत्यर्थानितिवेदा कगायत्स्वपुसत्वात्।
घ्राणंघ्रातव्यंचपृथिवीत्येवमित्यापृथिवीचपृथिवीमात्राश्चेत्यादिप्राणश्चविधा
रयितव्यंतेचेत्संतंप्रश्नश्रुत्यादौगुणगुणितयापठनस्यसत्वहेतोः। भूर्गंधवतीत्यादे
रथस्यश्रुतिसिद्धत्वादित्यर्थः। स्वगुणं। स्वास्वोगुणःस्वगुणस्तमनुसरंतो। स्वस्वगुण

वंतिसंतितानिस्वस्ववृत्तिविषयाणित्वक्कर्त्तामूलानीत्यर्थः। यद्वा। स्व-सत्वाबीजंनाता
इतिवेदेषु। सत्वात्तेस्वआत्मीयोगुणःसत्वंतमनुसरंते। अन्वयव्यतिरेकाभ्यांत्व
त्सत्वेसत्वमेतेषामितिफलितं। अलंकरस्तुवा [illegible] त्रं। सत्वावदेतत्सत्तेतिपदार्थहेत्व
कंकाव्यलिंगमपि। वेदसत्वादितिश्रुतिप्रसिद्धार्थत्वात्प्रमाणालंकारोपि॥ नद्वा॥ न
नुसंतिषुपक्षेसर्वमन्वेतिनचमीमांसकैःकर्मानुपयोगीस्वतंत्रईश्वरोभिमन्य
तेसत्तायांतुवेदसत्वादेतत्सत्वंवेदानांचेनश्वरनिःश्वसितत्वेतसाध्यासिद्धेःसु
तरामप्रामाण्यमितिजितमनीश्वरवादिभिरिति-चेत्। नयोब्रह्माणंविदधातियूयं
तस्मैवेदांश्चप्रहिणोतिश्रुत्यैश्वरकर्तृकत्वमभ्युपगंतव्यमितितिपिनकिंचित्। पर

तः प्रामाण्यवादिना फलितं कस्य हेतोर्मतः संदिहानैरेव बौद्धैः कुर्वशी विश्वामित्रमुखाना
मंत्रादिदर्शनात् षित्वमिति श्रुतिर्नाभ्युपगम्यते। तस्मादापामरपंडितप्रतीतेर्विष
यासत्ता प्रमाणेन निरूपणीयेति श्वराशयः। श्रवणं श्रुतीनामप्यानुपूर्वीविशेष रिता
नामांतर्गतैरेव पदवाक्यानां घटकतयोपादानभूतमीश्वरानुभूतं सकललिंगं पंचाशद्वर्ण
चक्रमाबलवृंद प्रत्ययविषयतुरपकं वंसएव वेदोस्त्विति विवक्ष प्रसंगादस्य मा
ल्पचि जाचिद्रो मांगभूतं चि यरूपमांतरं जपमपि सूचयति॥ पंचाशदिति। हे गिरि
शागशब्द इति धाते ल्पातीति व्युत्पत्त्या संपदादिकिपि दीर्घेनीः। वाक् तस्यामर्थेन
नसंपृक्ततयाशेतेरप्तिः हलादंतात्सप्तम्याः संज्ञायामिति लुक् सप्तम्याः। तथाच

वागर्थमयत्वेनैव प्रत्ययोस्त्वित्याशयः। संबुद्धिसुखस्यापि वागर्थव्यापार कर्पप्रा
र्थना सूचयति गुरुमुखान्नायविधास्वरूपा। गुह्यागमार्थतन्मंत्रसंधानाद्बोधना
दपि। रूद्रादिशिवरूपत्वात् गुरुरित्याभिधीयत इति कुलार्णवे। कश्चित्यामंत्रार्थो
नुसंधानपूर्वकमात्मतत्वोपदेशगुरुः शिव एव नान्य इत्यर्थः। तदुक्तं स्वच्छंदसं ग्रहे।
सर्वज्ञो हि शिवो वेत्ति सदसच्चाखिलं नृणां। तेनासौ नानुगृह्णाति किंचिद्रूपस्य गु
रोर्गिरिति। तस्य मुखे तल कूप नत्र पुस्तकाद्यवलोकनजनितव्युत्पत्त्यादिवला
धिगत इत्यर्थः। कल्लोलकहै लोपदेशेन सः प्राप्तमवनीतले। नदेवं परशिषेना
स्तिकेभ्यो नचेश्वरानाम शुश्रूषारतानां चनैवानर्थप्रसायिनामिति प्रस्तुतावि

वक्षितमुक्त्वाचरमे। कौलाचारपरैर्देवि पादुकाभावनापरैः॥ योगिनीमेलनोद्युक्तैः प्राप्त
दिव्याभिषेचनैः॥ शंकाकलंकविगतैः सदामुदितमानसैः॥ पारंपर्यविज्ञातरहस्यार्थ
विशारदैः॥ लभ्यते नान्यथा देवि लोकशापे सुरसुंदरि पारंपर्यविहीनाय ज्ञानमात्रे
णगर्विताः॥ तेषां समयलोपेन विकुर्वंति मरीचपरतियोगिनी हृदयादौ स्वतो मेहे
प्रत्यवायश्रवणादिति भावः॥ श्रुतयोपि। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो नि
र्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रो
त्रियो ब्रह्मविष्ठुतस्मै स विद्वानुपसन्नाय सम्यक् प्रशांतचित्ताय समन्विताय॥
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति प्रथमे मुंडके। प्रश्नो

पनिषदि सुकेशादिषण्मुनीनां ते है ते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष
ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवंतं पिप्पलादमुपसन्नास्तान्ह स ऋषि
रुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छ
त यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति श्रुत्या उग्रगुरुता शिष्यता वा पितृयोर्वत्सर
सत्तर इत्याधाकरस्य सम्मलता पुक्ता। कौषीतकि ब्राह्मणे बालाकिना षोडश पुरु
षषूपादि जातशत्रो राज्ञो यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वे
दितव्य इति प्रश्ने तत उह बालाकिः समित्पाणिः प्रतिचक्रम उपायानीति तं होवाचा
तातशत्रुः प्रतिलोमरूपमेव तन्मन्येयत् क्षत्रियो ब्राह्मणमुपनयेत हि व्येव त्वा

ज्ञपयिष्यन्तीति । वा सनेयिश्रुतावपि सश्वेतकेतुरारुणिरुद्दालको गौतमः प्रवाहणं जै
वलिं राजानं जिज्ञासुरुपैम्यहं भवंतमिति वाहस्मै पूर्व उपयंतीति ब्रुवंस्तेन[illegible]थान
स्ते गौतम मापराधास्त इत्युपक्रम्य को हि त्वैवं ब्रुवंतमर्हति प्रत्याख्यातुमिति तस्मै पं
चाग्निविद्योपदिष्टेति । छांदोग्यश्रुतावप्येषैव विद्या तामेव तेनैवोपदिष्टेति संसूच्य
तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदित्युपसंहारेण व्युत्क्रमेणापि गुरुत्वसं
भवादाबाल्यादपि सुभाषितं ग्राह्यमित्यर्थस्तु स्वतः सिद्ध इत्यें पञ्चवेन । प्रकृतमनु
सरामः । शिवादिपारं पर्यक्रमो हि तं । गुरूणां मंडलं नौमि यत्रैषा तेजसस्त्रयी । गरुत्र
यी । लक्षणं मंडलत्रयं सूर्यादिवत्सारच्छिन्नतया प्रतीतीयमात त्प्रमादिति हितस्यार्थः

त्रीतदुक्तं कुलार्णवे । आदित्यात्सर्वविद्यानां मामानोहर्षप्रवर्धनात् । यज्ञादिधर्महेतुत्वादान्मा
यइतिकीर्तितइति । यो आम्नायः आम्नायं अभ्यस्यंते आम्नायाः श्रुतिः स्त्रीरे च आम्ना
यइतिकोशाद्दूदास्तेषां विद्यावेदनरूपा चिश्राहेता लक्षणः [illegible] रिवलश्रुतिसार नेहप्र
कलैवैदै जौ ग्रु ष्टैः काप्यर्थसिद्धिरिति भावः । तथा च मुंडके ऋग्वेदायुक्त्वलक्षणमप
राविद्यामुक्त्वाऽथ परा यया तदक्षरमधिगम्यत इत्यायुक्तलक्षणा । सुंदरीतापनीयेपि
। ग्रंथमभ्यस्य मेधावि ज्ञानविज्ञानकोविदः । पलालमिव धान्यार्थी त्यजेद्ग्रंथमशे
षतइत्युक्त्वोपसंहारे वैभूताधिवासं तुरीयं योऽनुजानते त्युक्ते तीर्थगुणा
नुवादलभार्थवाद आविद्धयेन व्यवस्थायो कश्चनएवाशउपेयतया प्रतिपन्नइति

ज्ञायते। अत्राहुः। विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवा
दस्त्रिधा मत इति। आदित्यो यूपो यजमानः प्रस्तर इत्यादौ प्रत्यक्षविरोधे आदित्या
दिवद्यागनिर्वाहकत्वगुणस्तैर्लक्ष्यत इति गुणवादः। वायुर्वै क्षेपिष्ठा देवतेत्या
दौ मानांतरसिद्धार्थानुवादादनुवादः। अनयोः स्वार्थे तात्पर्यमाभूत्। इंद्रो वृत्राय
वज्रमुदयच्छदित्यादिष्वविरुद्धेष्वनुवादेषु स्वतःप्रामाण्यवादेनास्वार्थे तात्पर्यं
स्यनिवारयितुमशक्यत्वात्। परैकवाक्यताबलेनावांतरतात्पर्यं स्वार्थे प्रतिपा
द्यते ततस्तदेकवाक्यतया विधिषु प्राह्तातात्पर्यभूतो भूतार्थवाद इति तस्यार्थः। मं
त्रार्थवादेष्वयमेव न्याय इति मंत्रमूलैस्तस्य व्याख्यानेभ्यः। स्फुटीकरिष्यते। इत्यभिप्रा

यादपि चैतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत इत्यादिवा
जसनेयिश्रुतिस्वरसाच्च किं तुरीयमित्यपेक्षायां सोऽक्षरे परमे धाम्न्यधिवसते
ऐये तां तुरीयां ब्रह्मयोनिस्वरूपामित्याविद्यां द्युपन्यस्यैकाक्षरं ब्रह्मेति मारकास्कंधर
श्मिविवेचने विवक्षितमुक्तोपसंहृतं। कौषीतकिश्रुतावस्यैव प्रज्ञात्मादि निरूप चा
मूर्धानं यजुषामुत्तमांगं साम्नां शिरोऽथर्वणां मुंडमुंडं। मुंडमुंडनिति तापनीये तद
क्षरोपसंहारादिष्वितीव॥ नाधीते धीते वेदमाहुस्तमज्ञं शिरश्छिन्नासौ कुरुते कबं
धं। स्थाणुरयं भारहारः। कीलाभूदधीत्य वेदं न विजानाति योऽर्थं। योऽर्थज्ञ इत्सकलं
भद्रमश्नुते नाकमेति विधूतपाप्मेति मुंडमुंडमित्युक्त्या प्रज्ञामानमारभ्य स्वयं वा

जसनेपादिष्वांदोग्यावांतरार्थवर्णाश्चाथपरायत्यातदक्षरमित्यत्रैकवाक्यतयोपसंहृत
मित्ति।एवंचजपतिश्रुतिशिरनाग्रेषुयत्स्यादपप्रमितिव्याख्यातंवक्ष्यतेचपराध्यायवि
धानांमातृकाप्रयतात्नुपदमेवप्रमाणेमातृकेस्कधरशिवविवेकेच।यद्वागरुमुखेश्रासा
ननमान्मायश्चअभ्यासःसचासौविद्याचेतिसमासः।गुरुणानुलब्धंगुरसमानेत्यर्थः।कुलार्ण
वा पुरश्चर्यादिगुणसंपन्नेश्चहादिगुणसंपन्नादेशिकाल्लॅब्ध्वाशुध्यायथाविधियथा
संप्रदायमधिगतातदक्षरवाच्चितीवेत्त्रवेदनवेद्यमयिचिद्यामाःहासंवेदनरूया।निरो
धिकाभवेद्बोक्रिरधेंदुःस्यान्निशाकरः।अर्कःस्याद्भुमयोर्योगोबिंद्रात्मातेजसांनिधिः।
जातावर्णतोबिंदोःशिवशक्तिमयाद्भुतः।अग्नीषोमात्मकास्तेसुःशिवशक्तिमयाउ

वेः।येप्रसंभवमापन्नाःसोमसूर्याग्निरूपिणइतिशिवशक्तिमयत्वेनाग्नीषोरूपता
खिलवर्णानां।मातृकावर्णदेभेभ्यःसर्वेमंत्राःप्रजज्ञिरे।मंत्रविद्याविभागेनद्विविधामंत्र
जातइतिशारदातिलकादिषुव्यवस्थितताविद्यानिरूढाकारोपेशक्तिदेवतत्यर्थः।यद्वयो
गसारेद्विधाप्रोक्ताश्चतेमंत्राःसौम्यसौरविभागतः।सौराःपुंदेवतामंत्रास्तेचमंत्राःप्र
कीर्तिताः।सौम्याःस्त्रीदेवतास्तद्विद्यास्तेपिश्रुताइति।अनयो रूढ्येनस[illegible]मुद्या
दित्युक्तंभवतिर्थादविद्यांनियोप्ययछेनासिद्धनि।अतएवअननजीवनादिदशमंत्र
संस्कारेषुमातृकावर्णतंत्वमंत्रोद्धृतिर्दुननाख्यःसंस्कारइतिप्रमाणेनि।तत्स्वरू
पत्वेनमातृकायाउपादानत्वेनसमवायात्।तादात्म्यसंबंधस्वनिष्ठइत्युक्तंप्राक्॥

तथोक्तं। पंचाशद्वर्णमाला। क्षकारस्य मेरुस्थानीयत्वात् पंचाशदित्यकारादिलका
रांतानि वर्णानि पंचाशदिति। वर्णैरुच्चाक्षर इत्यनेकार्थः। तेषां परस्परं गुणगुंफिता
सुमनोमालेव माला। तदुक्तमभियुक्तैः। क्रमेणानेन सृजती कुंडली वर्णमालिकां॥
अकारादिसकारांता द्विचत्वारिंशदात्मिकां। पंचाशद्वारगुणिता पंचाशद्वर्णमालिकें
मिति। तथा चानयांतर्जपप्रकारोपि। यज्ज्ञानार्णवे। माला पंचाशिका प्रोक्ता सूत्रं शक्ति
शिवात्मकं। ग्रंथिता कुंडलीशक्तिः कथिता मेरुसंस्थितिः। मानसो जप उद्दिष्ट अनुलो
मविलोमत इति। तंत्रांतरेपि। अकारः प्रथमो देवि क्षकारोंत्यः प्रकीर्तितः। अक्षमा
लेति कथिता मातृका वर्णरूपिणि॥ पृथ्वीधराचार्योपि। आदौ वाग्भवबिंदु

बिंदुमधुरं तेच कामात्मकं योगात्तेकषयोस्तृतीयमिति ते बीजत्रयं ध्यायता।
सार्धं मातृकया विलोमविषमं संधाय बंधच्छिदा वांतर्गतया महेश्वरि मया मा
त्राशतं जप्यत इति। कल्पः स्वस्वसंप्रदायादूह्यः॥ सा विधा स्वरूपा मातृका माला। ब
हुविधनिनदोच्चारणादिति। वह्वो विधाप्रकारा येषां तथोक्ता निनदाः नादाः।
तत्तद्वर्णशिरस्थचैतन्यबिंदूत्थतपात्ततत्तादात्म्यभेदैरनंता इत्यर्थः। यत्स्वयाग
सारे नादात्मना प्रबुद्धा सा निरामयपदोन्मुखिता। अंतःस्थानप्रपन्ना संकोचवंति
स्रोतांसीति नादमयतेव वर्णानां। अत्र प्रमाणं। सोंतरात्मा तदा हृद्विनादात्मा नदति
स्वयं। यथा संस्थानभेदेन सम्यग्यो वर्णतां गतः। वा पुनः प्रेर्यमाणो सौ पिंडाः शक्तिं प्र

यास्यतीति न्यक्षभावाद्दुर्लभं तर्कहुविधान स एव निनदास्तेषामुच्चारणात्तद्दुर्लभ
कतत्त्वाद्दानांतत्त्वं तत्त्वलयया नामुच्चारणात्तत्त्वजालं। तत्त्वानां शिवादिक्षित्यंतानां जा
लं जालमिव जालं। यथा जालं मूलवत्स्वपे कवलीकृतमप्यनंतरं तत्प्रसरविस्तरं
तथेदं। प्रपंचांतरविस्तारमुकवलितजडारुडमित्यर्थः। यत्तु नरटनादेंदनाथे सर्वहरी
व्याख्याने वायवीयसंहितालेवधर्माद्युक्तानि एकपंचाशत्तत्त्वानि रूपितानि। पंचभू
तानि तन्मात्रपंचकं चेंद्रियाणि च त्वगादि धातवः सप्त पंच प्राणादि वायवः। मनश्चा
हंकृतिः ख्यातिर्गुणः प्रकृतिः पुरुषो। रागो विद्या कला चैव नियतिः काल एव च। माया

या च शुद्धविद्या च महेश्वरसदाशिवौ। शक्तिश्च शिवतत्त्वं च तत्त्वानि क्रमशो विदुरिति नि
रूप्य। पंचविंशो ह्ययं पुरुष इति श्रुत्यैकपंचाशदुक्तेर्विरोधमुद्भाव्य त्वगादयो धातवः सप्त
भूतेषु प्राणादयो वायो। अहंकारो मनसि। ख्यातिर्विद्यायां। गुणाः प्रकृतौ। प्रकृतिशक्तौ। पुरु
षो महेश्वरो। कला शुद्धविद्यायां। शिवतत्त्वे सदाशिवे तदंतर्भवंतीति पंचविंशतिरेवेति
न विरोध इति प्रपंचितं तत्प्रामादिकं। न हि श्रुतिवैश्चिर्विंशतितत्त्वानि पंचविंशइ
ति। सांख्यपरिभाषया प्रधानवत्प्रवृत्तेति नियमो नापितत्वमसीत्यादिमहावाक्य
वाच्येतरतत्त्वसंकेतोऽपि चैतद्दर्शनस्य सकलमतपक्षपातित्वमित्याग्रह स्वर्हिशि
वादिनियंतॄतानां पुरुषएवांतर्भाविरस्तु। तदुक्तं वायवीयसंहितायामेव। प्रयोवि

शक्तितत्त्वेषु परा प्रकृतिरुच्यते। प्रकृतेस्तु परं प्राहुः पुरुषं पंचविंशकं। तस्य प्रकृतिली
नस्यायं परः समहेश्वर इति। एवं चोपोद्धाते षड्विंशकतत्त्वानामुक्ता तत्र लक्षणसं
गतिर्निर्णयत्वादिशिवां तत्त्वानामन्योन्यमिथुनतां तत्रांतरोक्तं च संगच्छत इति दि
क्। तथा च तत्त्वद्वंद्वरूपां तत्त्वसंबंधिनीं व्यापारसत्तां। व्याप्रियते व्यापारः स च वैशे
षिकादिनये तज्जन्यत्वे सति तज्जन्यजनको व्यापार इति लक्षितो लक्षणेन। एवं चो
च्चारकजन्यत्वे सति उच्चारकजन्योच्चारणजनक इत्यर्थः। न ह्युच्चारणस्य मानसक्रि
याजन्यत्वेपि तद्धेतोरसत्त्वे सत्त्वमिति तत्करणव्यापारजन्यं कार्यमपि कर्त्तारमनु
मापयति। न हि कर्तृहीनाकारकं चक्रप्रवृत्तिरिति भावः। अकारः शिवाक ककाराद

पक्षांताः शक्त्यादितत्त्वरूपा इति षड्विंशतत्त्वात्मकं विश्वमिदमीश्वरकर्तृकमपीति स्फु
रति द्वात्तत्त्वजालं मजहल्लिंगत्वाद्वर्णमालाधात्वेति। विद्यातत्त्वानामुत्तरत्राभेदस्य
विवक्षितत्वात्तत्त्वजालमेवेयं पंचाशद्वर्णमालातत्त्वव्यापारसत्तामित्यर्थः। वक्ति कथ
यति। स्फुटयतीत्यर्थः। सर्वदेवायमर्थो वर्त्तमान इति लट्। वचेः परिभाषणमर्थ इ
ति पारिभाषिको युक्तिसिद्धोयमर्थः पूर्वप्रतिज्ञातप्रतीतिसाक्षिकत्वात्तमपि
। एवं द्वमात्रकायास्तत्त्वरूपतासिद्धा चैव यथापि खलु कश्चित्क्रियादृष्टसहकृतउ
च्चारकत्वेन किमापातं चावश्यं करणीयः षड्विंशतत्त्वजपोपि सूचितः। तद्विधिस
मकृत संग्रह कौमुद्यां उद्धव्यः। नन्वस्येति शंकापरिहरं स्तादशजपपूर्वकस्वत

त्रभुलजपस्य फलमपि इत्थं पूर्वकं निरूपयति। ध्यानादिति। यतः सा। यं चाशङ्कालंभमपि ला

।ध्यानात्।ध्यै चिंतायामिति चिंतनार्थत्वाद्वृत्तिनिरोधेन प्रणिधानात्। प्रत्ययैकता

नता ध्यानमिति पातंजलसूत्रात्। तथा चेत्तत्तथा चेद्धमनुभवगम्यः सहृदयैकवेद्यः

सूक्ष्मोयमर्थः॥ तथा च छांदोग्योपनिषत्। ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्या

यतीवांतरिक्षं ध्यायतीव द्यौर्ध्यायंतीवापो ध्यायंतीव पर्वता ध्यायंतीव देवमनुष्या

स्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवंति ध्यानापदंशा इवैव ते भवंतीति। तस्मात्क्रि

याशक्तिं विना ध्यातार्थस्याविषयता स्वीकारोनुपपन्न इत्याधः कश्चित्क्रियालक्षणः

स्वीकर्त्तव्यः स एव सृष्टिलक्षणः॥ तदुक्तमपि युक्ततरैः॥ सच्चिदानंदविभवात्सकला

त्परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद्बिंदुसमुद्भवः॥ पराशक्तिमयः साक्षात्त्रि

धासौ भिद्यते पुनः॥ बिंदुर्नादो बीजमिति तस्य भेदाः समीरिता बिंदुः शिवात्मकं

बीजं शक्तिर्नादस्तयोर्मिथः॥ समवाय। समाख्यातः सर्वागमविशारदैरिति। प्र

प्रयोगसारे। तस्माद्विनिर्गता शिमत्या सर्वगा विश्वसंभवेति। वायवीयसंहिता

यां शिवेच्छया पराशक्तिः शिवतत्त्वैकतां गता। ततः परिस्फुरत्यादौ सर्गे तैलं ति

लादिवदिति। एवमाद्यस्य सर्गादौ सच्चिदानंदरूपिणीं। समस्ततत्त्वसंघात

स्फूर्त्यधिष्ठानरूपिणीं व्यक्तां करोति तां नित्यां प्रकृतिं परमः पुमानिति पंचरा

त्रोक्तेरपि च भगवद्वाक्यैरपि। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परामिति

व्यक्ताव्यक्तभेदाद्द्वयमालोकभेदोद्भूतांदिकदंबकततद्वाचकाक्षरसंघातोद्
ग्वेदासिपराव्यक्ता।तस्याव्यक्ततयास्थितिर्भूमिर्वाच्यवाचकमपयापिसिसृक्षो
रसोच्छ्वसितांकुररूपाऽर्धमात्राऽनुच्चार्यासूक्ष्मनादलक्षणाशिवशक्तिसामर
स्यरूपातत्क्षणस्फुरतितदुक्तमचोर्यैः।स्वात्मन्यथोकालेतत्वेइति।भुवनेशीखु
तावपिनमस्तेरवत्वेनविश्वाभिधानेइति।कोऽर्थः।प्रकाशवीमर्शांशशांताबिमसा
मस्यसूयपराशक्तिनादरूपामातृकापूर्वरूपंपरमसूक्ष्माध्यानावस्थितेरुत्तरस्थ
लेनास्फुरितासती।उत्पत्तिपूर्वमिति।उत्पत्तिरत्रस्फुरणंलक्षपतिचर्णानांनिट्य
लस्यविवक्षितत्वात्।प्रमाणमपि।स्फुरत्तामात्मनःपश्येदिति।आत्मनःस्फुरणं

पश्येद्यदासापरमाकला।अंबिकारूपमापन्नापरावाक्समुदीरितेतिच।सापरास्व
स्फुरणमुत्पत्तिःसापूर्वाप्रथमाआपद्लणोयथाभवतितथेतिक्रियाविशेषणंतच्च
द्वितीयांतमितिपाणिनीयपरिभाषा[illegible]र्थः।रौद्रीबिंदोस्ततोनादाज्येष्ठाबीजादजा
यत।वामाताभ्यांसमुत्पन्नारुद्रब्रह्मरमाधिपाः।तेज्ञानेच्छाक्रियात्मानोवह्नींदु
र्कस्वरूपिणः।अभिधमानात्पराद्बिंदोरव्यक्तात्मारवोभवत्।शब्दब्रह्मेतितंप्रा
हुःसर्वागमविशारदाइति।सुंदरीतापनीयेपि।द्वेब्रह्मणीवेदितव्येशब्दब्रह्म
तिविश्रुते।शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छतीति।तस्मादाशैरितस्ततः
पश्यंतीमध्यमावाचिवैखरीसर्गजन्मभूः।इच्छाज्ञानक्रियात्मासावितिपा

प्रामाणिकोक्तरीत्या सैव पराक्रमेण वैखरी पंचाशद्वर्णमालेत्यर्थः। एवं चोक्तरौ द्विश
क्तीनां त्रिकोणहेतुत्वेनोक्तत्रिसंख्यानामपेक्षिके भेदे चिकोणस्य शक्तित्रिकोणमिति
पारिभाषिकोऽर्थः। षट्कोणादौ लक्षण्योपरिष्टाच्छि वत्रिकोणस्येति श्यामरहस्यप्र
पंचयंतः पूर्णानंदनाथाः प्रत्युक्ताः। तथा हि न हि शक्तित्रिकोणेऽपि छादय एव तिस्रः
शक्तयः शाः। किं त्वरौ द्यादयोऽपीति। एवं च चत्यमाणषट्कोणे शिवशक्तिसामरस्योद्भ
यित षष्ट्यधिकत्रिशतरश्मिचक्रार्चनं मुन्युक्तमप्यत्रानू[illegible]कृतं। यत्र चोपेक्षितो
भेदस्तत्रास्तु यथा चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि त्यादौ विशेषमक्र
तदक्षिणाचार्कल्पवल्यां द्रष्टव्यं। रसतलं पल्लवेन आचार्यैरपनेनैवाशयेनाग्रेनव

भिरिति मूलप्रकृतिभिरित्युपभ्रं न केवलं वैखरीप्रभृति किं त्वाहुयज्जातमि
त्याह। श्रुतिमुखेति। श्रुतिमुखमादिर्यद्वा मूलं येषां ते विविधाः विलक्षणाः अनेकाः
। तदर्तद्दर्शनरूपीणामानत्वादनेकत्वं। तदुक्तं। ज्ञानं योगः प्रवाशो विधिरुभयम
तिरित्यत्र सिद्धांताः शैवपाशुपतादयस्तैः प्रतिपाद्या द्याः निरुक्तपूर्वाः। न केवलं
संस्कृतानि किं त्वपभ्रंशानपीत्याह। नानेति। नान तत्तद्देशसंकेतभेदात् यद्वा मा
गध्याय पभ्रंशांतवद्विध भेदात् अनेका भाषाः अपभ्रंशान् तेषामपि मातृकारूप
तया वाच्यत्वादिति भावः। प्रकटयति स्फुतानेव स्फूर्तिविशेषैरधिगमयतीत्य
र्थः। अथ प्रकृतमुपसंहरति। यत एवं ततः सैव पंचाशद्वर्णमालैव स्वापि विकृतिरूप

वर्णव्रातवाच्यः॥ सांगवेदः॥ अंगे॥ शिक्षाकल्पो व्याकरणं छंदो ज्योतिर्निरुक्तय इति भट्टहरि
पठितैः संहितो वेदः। एकस्यैव शाखाभेदेन सः प्रयोजनभेदादेकवचनं। नहि मात्रकाति
पिकेश्रुत्यादिषु परूप्यते तस्मान्मात्रकैः शब्दब्रह्मास्म्यालभ। तेइति हि फणितं। धात्वनु
सु वर्णात्मनाविर्भवति गघपधादिभेदतइति वाक्यसिध्यादिकमपीति यंगयं। स्वा
गवेदइति पाठे देवस्य मात्रमेकीयशरीरत्वेन वाच्यत्वात्स्वांगः स्वान्यंगान्यवयवा वर्ण
लक्षणा यस्मिन्निति स्वांगो वेदः॥ तत्र स्वाव्यवपवस्य वर्णकदंबको वेद एव शब्दरूपस्स्व
प्रसीत्यर्थः॥ एवं च वर्णानां सृष्टिहेतुतया बीजतया तत्तदूतादिवाचकत्वात् हकारोद्या
नवाचकइत्यादिः प्रत्यक्षरंश क्षि   तिसिद्धा॥ अलंकारसूत्रांते सांगवेदत्वसमर्थन

वाक्यार्थहेतुकं काव्यलिंगमपि॥४१॥ एवं च प्रतिवर्णं शक्त्यष्टावच्छेदकसिद्धिं सहमाना वै
याकरणाः प्रत्यवतिष्ठंते। ते च केचनांतरस्फोटवादिनः॥ यथाहुः॥ निरंश एवाभिन्नो नित्यो
बोधस्वभावः शब्दार्थमयश्चांतरः स्फोटइति। केचिज्जातिव्यक्तिस्फोटात्मकं बाह्यस्फोटमा
मनंति। पूर्वपूर्ववर्णोच्चारणादभिव्यक्ततत्तत्पदसंस्कारसहायचरमपदोद्भासितो द्रुतं वाक्य
स्फोटलक्षणमखंडं कार्यप्रकाशकं शब्दब्रह्मेति। अत्राहुः॥ एक एव नित्यो वाक्याभिव्यंग्यो
ऽखंडो व्यक्तिस्फोटोऽथ जातिस्फोटो वा बहिर्रूप इति। ननु स्फोटस्यैव वाक्याद्यभिव्यंग्य
स्यास्तु प्रत्या   पकत्ते तिन वर्णानां शक्त्यष्टावच्छेदकसिद्धिरिति चेत्। शृणु। वाक्याभिव्यं
ग्यस्फोटस्तु तत्त्वदसंस्कारसहायचरमपदोद्बोधितो बहीरूपोन्यथासद्रूप इत्यस्त्वा

वर्णव्रातवाच्यः॥ सांगवेदः॥ अंगे॥ शिक्षाकल्पो व्याकरणं छंदो ज्योतिर्निरुक्तय इति भट्टहरि
पठितैः सहितो वेदः। एकस्यैव शब्दस्याभेदेन सः प्रयोजनभेदादेकवचनं। नहि मात्रकाति
पिकं श्रुत्यादिषु परुष्यते तस्मान्मात्रकैः शब्दब्रह्मास्यालभा। तेइति हि फणितं। ध्यानु
खुवर्णात्मना विर्भवति गघपधादिभेदतइति वाक्यसिध्यादिकमपीति व्यंग्यं। स्वा
गवेदइति पाठे देवस्य मात्रमेकोयशरीरत्वेन वाच्यत्वात् स्वागः स्वान्यंगान्यवयवा वर्ण
लक्षणा यस्मिन्निति स्वागो वेदः॥ तत्र स्वावयवस्य वर्णकदंबको वेद एव शब्दरूपस्त्व
प्रसीत्यर्थः॥ एवं च वर्णानां सृष्टिहेतुतया बीजत्वया तत्तद्भूतादिवाचकत्वात् हकारान्या
न्वाचकइत्यादिः प्रत्यक्षरं श क्ति तिसिद्धा। अलंकारसूत्रं तु सांगवेदत्वसमर्थन

वाक्यार्थहेतुकं काव्यलिंगमपि॥४७॥ एवं च प्रतिवर्णं शक्त्यास्तावच्छेदकसिद्धिं सहमानावै
याकरणाः प्रत्यवतिष्ठंते। ते च केचनांतरस्फोटवादिनः। यथाहुः॥ निरंशएवाभिन्नो नित्यो
बोधस्वभावः शब्दार्थमयश्चांतरः स्फोटइति। केचिज्जातिव्यक्तिस्फोटात्मकं बाह्यस्फोटमा
मनंति। पूर्वपूर्ववर्णोच्चारणाद्भिव्यक्ततत्तत्पदसंस्कारसहायचरमपदोच्चारितोद्बुद्धं वाक्य
स्फोटलक्षणमखंडैकार्थप्रकाशकं शब्दब्रह्मेति। अत्राहुः॥ एक एव नित्यो वाक्यात्मिं ययो
ऽखंडाव्यक्तिस्फोटस्य जातिस्फोटो वा बहिरूप इति। ननु स्फोटस्यैव वाक्यात्मिवं यय
स्यास्तु प्रत्या पकतेति न वर्णानां शक्त्यतावच्छेदकसिद्धिरिति चेत्। श्रृणु। वाक्यात्मिवं
ग्यस्फोटस्तु तत्तत्पदसंस्कारसहायचरमपदोद्बोधितो बहीरूपोऽन्यथासदूपइत्यस्तो।

तरः स्फोट इति नावकाशस्तन्नात्र। पदप्रकृतिः संहितेति पदानामेव प्रकृतत्वादिति। आंतरः स्फो
टोपि शब्दार्थमय इति शब्दस्य प्रकृतिप्रत्ययभेदवतः पानं सवतीत्यादे पानवे।रणावव
यवस्यापि पातेस्तदर्थप्रत्यायकत्वात्। भवतीत्यत्र सत्तार्थे भकारोपीत्यापाभ्रंसकेतप्रत्य
यान्मातिवर्णेशक्तिरित्यांतरोपि भास्कु। यद्वा केशा इत्यत्र वाक्यार्थे पिंडिते अलकेश कः॥ अ
वयवार्थे प्रत्येकसंज्ञया पदत्वेन द्वंद्वे ब्रह्मविष्णुशाः प्रतीयंते तत्र ककारोकर्दमात्रयो ब्र
ह्मविष्णुप्रत्यायकत्वेनैव वर्णानां प्रत्येकं शक्तिसिद्धेः। अस्मादेवानुराधान्नयीनवैशेषि
कादिभिरपि स्वतंत्रेषु तत्तद्वर्णनाशेपि वदमवर्णस्वदशीशक्तिस्वीक्रियते न पदस्ये
ति। नन्वस्तु तत्र पदसंज्ञयैव शक्तत्वात्। सत्यं। ॐ इत्योंकारे पंचावयवाः। अकारो ब्रह्मा। उका
रो विष्णुः॥ मकारो रुद्रः॥ नादः सदाशिवः॥ बिंदुरीश्वरः॥ तत्र वाक्यार्थे अकारोकारमका

रा बिंदुनादादिक्रमेण निरवयवाः अन्ये विंशोयं त इति तिङ्हितस्यार्थस्तत्रावयवानां ब्र
ह्मादीनां प्रत्युयो ब्रह्मादिभिः हुपि दुर्वारः॥ अन्यय परिभाषयैव ताचती शक्तिरिति
चेत्। सिद्धात्वदूषिणां स्वराणां मन्ययत्वेन परिगणनैर्नात्। न तत्र षंढवर्णचत्र
ष्टयानुस्वारविसर्गाः पठिता इति चेत्। अकारेकारोकारा एव तत्र योवक्ष्यमाणरीत्या
प्राट्काहेतवइति त्रिनिरवालं। हृषिदेशनादितित्परिगणनमुपेयमिति चेत्।
न च हमपिक्रषिः। मंत्रो हीनः स्वरतो वर्णतो वेति नारदेनोदात्तादिस्वरोपयिकतया
तत्प्रक्रियांगीकृतेति चेत्। नानारदस्य फक्स्वादीनां पंचमात्रत्वादिना उदात्तादी
नां ऋषभधैवतादिपरतया विवक्षितमेदात्। अस्मादेव विरोधाद नूमुनिना

एकमात्रो ह्रस्व इत्यादिना स्वप्रक्रियायां निबद्धं मन्दानां त्वादिलक्षणसंपन्नानामेव नारदा
दिप्रोक्तौ रूषभसंज्ञाभ्युपगंतव्येति चेत्। एकवाक्यतयैवानयानुकूलाः स्मा। इशानः
सर्वविद्यानामिति श्रुत्या सकलसिद्धांतानामीश्वरप्रणीतत्वेनैकवाक्यतयैव सामंज
स्यमिति सकलसिद्धांतानुरोधेन वर्णानां पदप्रकृतित्वा। दुर्लभय्यैव वाकृत्स्नेरित्याह
विर्णेभ्य इति। वर्णेभ्यः अकारादिपंचाशदक्षरेभ्यः धातवः। भूवादयो धातवः। सनाद्यंता
धातव इति वैय्याकरणपरिभाषितः। तेभ्यः प्रा प्रकाशोऽलिङ्ग। भवेयुः। वर्णानामेव वि
लक्षणानुपूर्वीसंनिवेशात्मत्वे च वच्शब्दप्रभृतयो धातवो भवंति न ते वर्णातिरिक्ता इ
ति भावः। तदुतो द्विविधपदचयः। वानूधातून्नगतः प्राप्तः धातुप्रकृतिः प्रत्ययप्रयोगा
त्सिद्धः द्विविधः द्विप्रकारः सुप्तिङंतं पदमिति सुबंतो देव इत्यादिः तिङंतो दिव्यती

त्यादिः। पद्यंते प्रतिपद्यंतेऽर्था एतैरिति व्युत्पत्त्या पदानामप्यर्थप्रत्यायकत्वाद्वर्णावत
दवयवभूताः प्रत्यायकत्वेनांतरः स्फोटोऽभ्युपेय इति भावः। तेषां चयः समूहः। तेन प
दचयेन वाक्यं जायत इति शेषः। वाक्यानां पदचयप्रकृतितयैवांतरस्फोटादर्थप्रत्य
येन वाक्यस्फोटावसर इति भावः। पदचयश्च वर्णाव्यभिचरित इति प्रकृतसंगतिः। त
स्मात्। वाक्यात्। विविधमनंतप्रकारं निगमयति उपसंहरति विविधनिगमनात
स्मादुपक्रमोपसंहारविरोधविप्रतिपत्त्यानानासिद्धांतसंभव इति भावः। वाक्य
स्य पदप्रकृतित्वं पदानां च वर्णप्रकृतित्वाद्वर्णमूलत्वेवेत्यर्थः। प्रमाणं। वेदाः प्रमाण
मिति श्रुतेर्योजाता इत्यर्थः। तेन प्रमाणेन। सिद्धांतजालं। सिद्धांताजालं समूहः। जा

सत्त्वं चाविवेचितत्वेन प्रतिबंधकत्वात्। तथा च नन्वर्णमयत्वव्यतिरेक इत्यर्थः। तस्मात् सि
द्धांतत्वाभावात्। यातः कुत्सिद्धांतप्रतिपादितानन्तानादिधिष्ठात्रीसती स्वस्याः। नानामतां
। तन्नदनुगुणस्वरूपवत्ता। प्रकटयति। तन्नसिद्धांतिनस्तादृशतादृशप्रत्ययेन विभा
वयत्येकैसतीत्यर्थः। तदुक्तं। बहुधा गमैर्भिन्ना इत्यादि। वर्णोनारभ्यसकलसि
द्धांतावधि एतासां आद्यस्यावधारणे। सैव पंचाद्वर्णमालैव लब्धीपालसंबधिनी
तत्त्वानां अकारादिवाच्यानां षट्त्रिंशतां शिवादिक्षित्यंतानां विद्यावेदनोपापत्त्व
वेत्यर्थः। तथा च विद्यायास्तत्त्वरूपतया तदतीततया च सुतरां तत्त्वतदूच्च तदती
तत्वं तस्ज्ञायतेतयेति तस्या विद्यात्वमर्थमित्यर्थः। नहि तत्त्वसंघ्कासात्वं वेदपि ह

शक्येति तदतीतत्वं तस्याः। तदुक्तमुत्तरचतुःशतीशास्त्रे। स्वधर्मैरेजनभेदेन सप्तत्रिंश
त्स्वरूपिणी। सप्तत्रिंशप्रभेदेन षट्त्रिंशत्तत्त्वरूपिणी। तत्त्वातीतस्वभावा च विद्येषाभा
व्यते यदेति विद्याप्राप्तिरपि शक्तितएव प्रतिपादिना कूर्मे योगाध्याये पार्वतीपरमादे
वी ब्रह्मविद्याप्रदायिनी। यापि ध्यानविशेषेण रूपिमहद्भेनानुगेति। एवं च तत्त्ववि
द्येति कथनात् संप्रदायार्थः षड्विधार्थमध्यात्सूचितं तेन पंचापि लक्षिता उपरि प्रपंचयि
ष्यंते मातृकारश्मिविवेचने। ननु वस्तुतथाविद्यातया मम कः संबंध इत्याशंक्याविवक्षि
तचित्सृजाविषयमप्याहात्वमित्यादि हे महेश। मनोदोषादरूपत्वाद्वचनादादिवर्जिना
त्। श्वादिप्राणिषु सादृश्यादृश्यत्वाच्च महेश्वर इति कुलाए विशुक्तनिर्वचन अश्वेता

श्वरेति श्रुतिः। तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं। पतिं पतीनां परमं
परस्ताद्विदाम देवं भुवनेशमीड्यमिति त्वां वेदैकोसि। वेदैश्चासावेकश्चेति। विद्या
यास्तरंति सिद्धांतपारवश्यात्तानालेपिनवेद्यनाना। त्वमित्यर्थः। कुतः। यतो द्वितीयः। ए
कमेवाद्वितीयं ब्रह्मेति। एको रुद्रो न द्वितीयो वतस्थे इत्यादिश्रुतेः॥ नन्वेवं कुतायतः
क्रमरहितमहासंविदात्मा। क्रमः। अथातो धर्मजिज्ञासेत्यादिना जैमिनिमुनिना क्रा
स्त्वरुहिता। तदुक्तं मुनिनैवार्चनत्रिंशतिकायां। स्नानपूजनशमादिभिः क्रमाद्यम्
ह्रात्मनिरवाप्यते पदं। कैश्चिदक्रमतयैव लभ्यते तत्समर्चनमिषेण कथ्यत इति।
अतर्यजनस्य विवक्षितत्वान्न देहशुध्यौपयिकक्रमापेक्षितिभावः। यद्वा ततदधि

कारिणां जैमिनिक्रमः महावीतक्रमौ सूचितौ। कालसंकर्षिणीमुखानामपत्रस्तु क्रम
लेनापि प्रतत्वादितिदिक्। नारशीचासौ महामिविदुक्तकृत्यमाणा निर्बंधनानिमर्शा
त्माशक्तेः। सर्वाभिप्रायरूपा तस्मात्तत्स्वरूपः शुद्धसंविन्मय इत्यर्थः। अतस्त्वमेवेष्ट
व्य इत्यर्थः। अलंकारस्तु कारणमाला। तथा विद्यासमर्थनरूपं काव्यलिंगमपि। म
ह्वेशेति विशेष्ये सामर्थ्ये परिकरांकुरोपि। विशेषणसाभिप्रायत्वात्परिकरश्च।
वदेवात्क्रियाशक्तिव्यवस्थल्यनप्रसमेन विद्यातद्वैचनिरूपाप्रकरणसमाप्ति
चिमरजादिक्रियासेवातवासनाविवेददूरे केनयायास्थजस्यो ध्येसाधनेस्या
पातरक्रिया विशेषत्वात्तद्रूपसनांगनिरूपयति। यत्रास्थामपितिरिष्यते यज्ञः।

यजयाच्चेति तदु । तस्य स्थाने कर्मप्रशस्तस्थले । श्मशाने शवति विकारं प्रापयतीति श्री
वृमितिक श्मशानमिति हि नैरुक्ताः । श्मशानस्यापि यवनामिति कोशः । तदुक्तं फेत्कारी
ये ।। एकलिंगे श्मशाने वा शून्यागारे चतुष्पथे । त्रेते स्थः साधयेद्योगी । विद्यात्रिभव
तारिणीमिति । पंचकोशान्तरे यत्र न लिंगान्तरमिष्यते । तदेकलिंगमाख्यातं तत्रत्यासिद्धिर
नुत्तमेति तन्त्रे वा कुमारीतन्त्रे वा शवपिठ कूटे पर्वते वापि निर्जने वा चतुष्पथे । देवागार
देशशून्ये बिल्वमूले नदीतटे । स्वगृहे निर्जनारामे श्मशाने शवसंनिधाविति । ता
राकल्पेपि । एकलिंगे श्मशाने वा शून्यागारे चतुष्पथे । पर्वते निर्झरे स्वावापुष्पग्रा
मे सुरालये । तडागे वा योगिमुख्यो जपेन्नीलसरस्वतीमिति । ननु चिन्मयाद्वैतप्रकाश

स्यात्तस्येन्यस्थलं जुगुप्सितेजुगुप्सितं कथं संभवतीति चेत् । स्यादेतत् । यद्यपि । भावि
के श्मशानमंत्र निवसिते । स्यादिहैव महाप्रलयसंपत्ताव सत्तो समुपागते । शिष्यते पर
मात्मा सौ श्मशानाग्निरिव ज्वलन्नित्यप्रत्यभिज्ञा स्वरसादत्रैव त्रिभुवन करवीरा
ख्यशून्य श्मशाने इति मुनिना वक्ष्यमाणत्वात् । यः श्मशान इह भूतवृस्मरं रज्यते बक
रवीरनामश्मनीतिचिद्गगनचंद्रिकोक्ते श्वब्रह्माण्डमेव विगलितभूतौडंबरं त्रिपुरकं
रुणारा धनेकर्मतरे स्थः स्वपयत सुभयेनतत्त्वे । नन्वेतकालइदमालतनोः स्वनेत्रसं
भूतवाकृतिस्वाप्यां भसितनवदेति । कपालि श्मशानमित्यर्थः । करवीरास्यं शून्यं ।
श्रीतयंत्रनस्य स्वातः क्रियासाध्यत्वात्तच्च सप्तकोशमयमयरूषण दूषितनुपित्रको

ननु चारिद्धि सोऽवगिते मदुक्तरीत्यापि दुस्पत्रं आउलेनैव पूर्वं प्रतिपादितत्वाद्घोषि
नां प्रत्यक्प्रवणतया पंथरेकरणगलेनादानुभवोल्लसितं मनसि तदनुरूपक्रिया
रूपे प्रपंचाडंबरस्य निवृत्तत्वात्तत्स्वरूपश्रवणानरूपतैव। तदाडंबरस्यापि सूक्ष्मसू
क्ष्मतरनादावस्थया। लयक्रमेण मनःस्थानाद्युपर्य्युपरिस्फुरणात्। तदुक्तं चि
दृगनचंद्रिकायां। वह्निभानुशशिविद्युदातपज्योतिरिंगणनभश्वरादयः। येस्फु
रंति हृदये पिचारवाद्यैस्तैश्चिदंबरगतैर्विभूयत इति। तदेवाह। सकलेत्यादि
ना। नहि सकलक्षेत्रे क्रियोपपत्तिरिति पीठमाह। अग्न्यास्थितं तत्रेति पदं त्रोतेदत्या
प्रयागस्थले सत्रद्वितीयस्थानान्यथानुमपत्या काकाक्षिगोलकवदत्राप्यन्वेति। ए

वं संबंधः। तत्र। यागक्षेत्रे। सकलमिति। गृह्णे सकलाःमितयस्ततन्सिद्धांतव्यवस्था
पिताः प्रमाः। एवं च तत्र प्रणवतया प्रतीकतया वा कौषीतकि ब्राह्मणमारभ्याथ
र्वणांतश्रुतिस्मृत्यादि पठितावीद्या विज्ञानि च प्रणवतया परिगणितानि कानि
चित्ताः प्रमास्तासां ग्रहे। यथा चैषां प्रणवत्वं तथोंकारं स्थाने वा समित्यत्र विशद
यिष्यामः। यद्वा सकलोपनिषात्स्थिताः। ओमित्येतदक्षरम। उद्गीथमुपासीतेति
छंदोगानां श्रुतिः प्रकारांतरेण तस्यैव स्वरूपमेदानुपास्तिविषयाः नाहि कौषीत
किश्रुतिर्हिरण्यगर्भमुद्दिश्योपक्रांतातद्विरुद्धमेवार्थं इति। एवं यजुःश्रुतयो
पि तमेवार्थं भंग्यंतरेणाहुः। मुंडोपनिषदि। ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः

परायतमसः परस्तात्। यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठित इति। कठवल्ल्यामपि। यदिच्छंतो ब्रह्मचर्यं चरंति तत्पदं संग्रहेण ब्रवीम्योमित्येतदिति सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति। सकलश्रुतीनां गृहं। विश्रामभूमिः। ततो नेतिनेतीत्यवोपरमादिति भावः। भास्वदोंकार पीठं। भासः कांतयो ऽस्यास्मिन्निति भास्वत्। बिंद्वादीनां रूपं ज्ञा। सूर्यकोटिप्रतीकाशमतिदीप्तमहनुपमाणि प्रमाणरीत्योत्तरत्र विवक्षरं ज्योतिःपुंजवदुज्ज्वलमित्यर्थः। अत एव तारांकत्वाद्वोंकारस्य पंचरश्मिरिति संकेतः। तदुक्तं। अनुस्वारं समुद्धृत्य मायोत्तरमतः परं पपंचमं समुद्धृत्य पंचरश्मिः प्रकीर्तित इति। बिंदुनादाविति पंचेति भावः। तादृशमैंकारः। ऐंकार एव पीठं यस्मिन्। अत्र प्रश्नश्रुतिश्च एतद्वै सत्यकामः परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति। तत्रैव। तमोंकारेणैवायतनेनान्वेति विद्वान्। यत्तच्छान्तमजरममृतमभयं परं परायणं चेतीति। कंपंचाशत्पीठे ओंकारपीठस्योड्डियाणमिदं तयापाठात्। तदुक्तं दक्षिणामूर्तिसंहितायां। तत्रस्थे बैंदवे पीठे तत्र निल्याकलां बुजे। तत्र कामेश्वरीपीठे निषण्णां तन्त्र धार्मिणीमिति। पीठवासनात्सु चिद्घन चंद्रिकायां। आद्यचित्सु सशक्तिरं बिकेगाढतां व्रजति यत्कृता स्यदा। आसतं शिवमुपास्यतं जनः। शक्तिचक्रमनिशं प्रचक्ष्यते। अंबुशक्तिवपुषा लसोन्मिषद्रूपया समरसः शिवोयद्दा। यत्र सोऽस्ति विर्यमूर्जितं पीठे ऐसमहांस्त्वदुक्तितरति। तादृशं

स्थलं यागमंडपरूपं। प्रयागः प्रयजनं प्रयागः॥ तत्र श्रुतिः। प्रयोगो देवयजनमिति। इडापिंगल
योर्गंगायमुनाख्ये नाड्यौ चक्रे मनः स्थाने तयोः संभेदात्तस्य तादृशक्षेत्रत्वं। एतच्चान्तर्यज
ने व्यक्तीकरिष्यते। स्नानवासरनाविवेचनेनिपुरतरं। प्रयागत्वं पुनरगणितयोगिभि
स्तत्रानुभवं कृत्यमाणक्रमेणानुदिनं परमेश्वरस्य विहितत्वाद्विधीयमानत्वाद्विध
स्यमानत्वाच्चेत्युक्तं पाराशरपुराणे। अविमुक्तमिति ख्यातं क्षेत्रमास्तियमालयं। संसा
रविषदष्टानामसगतीनां महौषधं। अधिभूते तथाध्यात्मे अधिदैवे च संस्थितं। पापाना
मपि सर्वेषां भवानि बन्निवर्त्तकं। अधिभूते स्थितामावीयस्तु ब्रह्माण्डविग्रहः॥ विराडा
त्मा भुवो र्मध्ये सुस्थितं तस्य सूत्रकं। जीवानां व्यष्टिभूतानां सर्वेषां तदंतरितो तस्म

धिभूततया प्रोक्तं तस्याध्यात्मिकमेव वै। अधिदैवतया प्रोक्तमविमुक्तं तदास्तिके। कु
रुक्षेत्रं प्रसिद्धं यद्भूम्यां पापनिवर्त्तकं। तदाश्रयं च लभते पुरुषो स्यैव सेवया। देवानां
देवयजनं प्रसिद्धं यन्महेश्वरि। सर्वेषामपि देवानां तद्ब्रह्मसदनं परं। अन्यच्च पापसंबा
तनिवर्त्तकतयैव तु। प्रसिद्धं सर्वलोकेषु स्थानं तीर्थं च यच्छ्रिये। इदमेव हि तत्सर्व
मविमुक्तं यदव्ययमिति। अतिविपुलमिति। ब्रह्माण्डलक्षणान्तरणाद्विपुलादपि वि
पुलतरमित्यर्थः॥ विशालं पृथुलं महत्तवज्रोरु विपुलमिति मंडपे। महत्त्वं पुनरस्य
देशकालाकाराद्यनाकलितत्वलक्षणं। नन्यूनपरिमाणपेक्षं। तथा च तादृशक्षेत्रए
तादृशमण्डलप्रणवाख्ययागमंदिरमित्यर्थः॥ तदुक्तं ज्ञानार्णवप्रणवाख्ययागजे

हंप्रतिश्यामरवंदिते। इच्छाज्ञानक्रियाइत्यरश्मिते सुधयायुते। अंबयापरमेशानि तत्वज्ञा
नमयेशुभे। पर्यंकपुरुषौथैस्तु नेदैश्चपरिमंडिते। आत्मांतरात्मपरमज्ञानात्मोगविभूषि
ते। तत्पदार्थस्त्वंपदार्थोसिपदार्थश्चसुंदरि। पदार्थत्रयमेतद्धि ज्ञानसूत्रप्रकाशकं। ए
तत्सूत्रमयैःपीठैर्गुंफितेऽंबरमंडिते। सुमनोवाससुभगे परांतत्रप्रपूजयेदिति। पु
नस्तत्रत्यारश्मिदैवतादिवृंदसंपत्तिमाह। कल्पवृक्षाधिरूढैरिति। कल्पवृक्षान्अ
धिरूढाः। विविधस्वस्ववासनाव्यञ्जनसंकल्पोल्लिखितकल्पनारूपशाखाविटपां
कुरांबुरमज्ञोद्धुरसत्यसंकल्पलसफलेषु नानाकल्पवृक्षेषुस्थितैरित्यर्थः। तदु
क्तं मुनिनैवाचनत्रिंशतिकायां। भैरवाविविधकल्पनात्मकाः प्रोच्यंतिसततंय

तोविकारइति। भैरवैः भरणाद्रमणाद्वमनाद्भैरवाः। सृष्टिस्थित्यंतहेतवइत्यर्थः। तदु
क्तं। प्रारंभाद्रमणाद्वमनाद्भैरवोदेवईरितइति। तैश्चकारात्। भैरवैर्वीत्तिरपि। गणान्
समुदायानूपांतिगणपाश्लेषेचतेचतौसुंवीतेसंवीयतेस्मसंवीतं। परिवृतमित्यर्थः। उरग
पतिगणपैः। उरगानांपतयश्शिवरूपत्वेव्रजगणपश्चु जगामूलाधाराधाश्रांतचक्रेषुष
ड्सुदहनार्कशीतदीधितिमंडलतयापरिणतेषुत्रिलोकीरूपत्वेनषडाधार
स्थादेवताएवतत्संव्यपदेश्याः। योगिनस्तदवसरेमूलादिविशुध्यंतेसर्वाजस्थो
नांदेवतानामात्मसाम्यमेवसमन्वयात्। तदुक्तंमयैवसांबगीतेरक्तेतयाचमिथुनैर्गु
णकीर्ना। केस्मिन्नालोकितांबुजवनीप्रतिबिंबलिलः। श्रृन्येलयेनचिरमंततमालि

ध्वनितं स्थानेषु तेषु कल्पयन्। विभुरारूपोहे एवं संबंधस्तत्रैतादृशं स्थलं प्रयागस्त
त्रैतादृशमोंकारपीठं सकलप्रामाणिकप्रथितं। प्रादुर्भूतं आविर्भूतं। सुप्रहाराद्दी
प्तवह्निमेदरित्यत्रैव वक्ष्यमाणत्वादित्याय यथा स्वसंप्रदायं कुंडलिन्युद्बोधप्रकटी
कृतमित्यर्थः। तत्रेति तत्र प्रणवाख्यायागगेहे। वह्निव्रध्नेंदुकं प्रं। वह्निरनलो दश
कलो लोध्यपात्राधारत्वेन विवक्षितः। व्रध्नः। वर्धते व्रध्नः। भास्करो द्वादशकरे व्रध्न
ति कोशः। इंदुश्चंद्रः। पात्रं तदंतरालस्थपूरितामृतं च तैः क्लृप्तं। कल्पितं। अत्रैवं प
क्रिया। अजपाविलोमिता सोहं स्यात्। सकारहकारयोर्लोपे पूर्वरूपे प्रणवसि
द्धिः। तदंशः प्रथमो वर्णो विसर्गात्मिकः। सर्गः शक्तिनिशाकरप्रतिनिधिरेषः। वि

सर्गस्य सकारादेशे रुत्वे च कृते उकारादेशो भवतीत्यग्नित्वं। यद्वा तस्यां सूर्ये उपा
वकार। प्रणवस्य त्रिभिर्वर्णैरित्याभियुक्तरीत्या प्रणवस्य भेदत्रयविवक्षायां स
र्योदिमंडलत्रयात्मकाद्दष्टत्रिंशत्कलास्त्वाश्च बीजरूपतया पंचभेदविवक्षया पं
चाशत्कलस्त्वाश्च योनिरूपतयेत्यग्ने स्फुटीभविष्यति। अजपाविलोमनप्रक्रिया प
दःर्थादर्शे क्ष्मणाचार्यपद्यव्याख्याने। वायवियसंहितायां च। लोकवृत्तिप्रवृ
त्त्यर्थमाकाशमरुदाश्रयात। संचरंति त्रयो भूता वह्निसूर्येंदुरूपिणः। तेजोरूपा
त्मकं यत्तु स वह्निस्त्रिगुणः स्मृतः। भिन्नास्तमोरजःसत्वैस्तद्गुणानवधाभवन्।
वह्नेः कला दश प्रोक्ता बिंदुनां सहधर्मदाः। ब्रह्मात्मकोरसोयमृतस्तु सूर्यः स्व

ऽर्गलाः॥ तद्गुणगुणभेदेन पुनस्त्रिंशतां गताः॥ तेन द्वादशविख्याताः सूर्यस्य धनदाः कलाः॥
वह्निनादकला ह्येवमसृत्वेला सदृश्यते। या च विद्युल्लतिकाख्या श्रीसोमोसौ गुणपञ्चकः॥
तेऽपि प्रत्येकभेदेन गुणाः पञ्चदश भवन्। ताः कलाः सह बीजेन षोडश संदोहनगदा इति।
उभयथाप्यष्टत्रिंशत्कलामयाबिंबत्रयात्मकमिदमर्घ्यमिति विवक्षितं। एवं च श्रीकंठ
दिश्रीधरान्तकामगलेशादिमिथुनमातृकाबीजानामुभयत्रापि पंचाशद्बीज
संपत्तौ सत्यां चिताभवति। संवीतैरिति पाठः। तादृशे क्षेत्रे तादृशे प्रयागस्थलरूपमंड
पेऽन्तरक्रियाविशेषप्रादुर्भूतवर्णैकारपीठरूपे यागमंदिरे संवीते भैरवादिभिर्बिंब
त्रयवासनयालंकृतमित्यर्थः। तदापात्रमर्घ्यमानसक्रियायायोगिनिधत्वात्तत्संक

ल्पसिद्धान्तो तदीयकृति सिद्धकल्पवृक्षाधिरूढानां तत्समर्पितविभावनातिरिक्तक्रिया
याऽनुपपन्नत्वे सिद्धकल्पिताद्वैतानुमोदितोऽतो द्वितीयांतमेव साधीयः। पुनर्व्याख्यानम
न्यथास्तु। संवीतमिति द्व्यर्घपात्रे विशेषणीयं। ब्रह्माण्डरूपं पिंडश्मशानान्तर्योगिनोऽरू
मध्यरूपप्रयागान्तस्तत्क्रियाविशेषाविर्भूतं। भूचरखेचरान्तरिक्षचरगोचरदिक्च
रादिनामोंकारे प्रतिपत्त्यभावेनाखिलानां युक्तातत्र समन्वयात्तैः। यद्वा क्षेत्रस्थैरेवतैती
रभैरवादिभिः संवीतं संवितरक्षितमित्यर्थः। अत एव नद्व्यतिरिक्तविपिनशक्ति
तारत्वस्वरूपपरमाचिदंबरे प्रवेशः। स्यात्पाथेस्तु न दैवी सौम्याग्रेयास्मरतद्वैरीति प्रमा
णान्तरात् त्रीणामात्मकमित्यर्थः॥ तादृशमर्घ्यं विवक्षितं चित्स्वरूपं चितं चितापात्रेऽपि

सर्थः। हे परशिवापुरुषा परं किंचित्सा काष्ठा सा परा गतिरिति श्रुतिरिला एतस्मात्क्रि
यादि गोचरादिशैती ताकृतः यतस्त्वरदं श्रेत्रा घर्ष्यौतं सकलं। कलाभिरष्टत्रिंशत्कला
भिर्विश्वमयीभिः सहिता। ताश्च स्वछंद संग्रहोक्ता यथा। षड्ढो लां तास्त्रिकोणे त्वाग्नि
बिंबं कलायुतं। आवाह्याधारतो देवि पूजयेन्मंत्रवित्तमः॥ धूम्रार्चिरूष्मा ज्वलरक्ता च कपि
लो विस्फुलिंगिनी। ज्वालामालार्चिष्मती तु ऊर्ध्वं हव्यवाहिनी। अष्टमी हव्यवाहा
च रौद्री संहारिणीति ततः। यादिक्षांता न वर्णाश्च कलाव वह्नेर्महेश्वरि। हृदया सूर्यबिं
बिंब समावाह्य स्वमंत्रतः। पात्रं तत्र प्रतिष्ठाप्य संपूज्याथ कला यजेत्। कादि ठांता
स्तत देवी मूर्तिर्ना मन्नास मीरिता। तपनी भासिता चैव शोधिनी शोषणी तथा। श्री

मणी केशिनी चैव वरेण्या कर्षिणी तथा। सुषुम्णा धोर्वष्टि च ह्यज्येणा चैव हिरण्य.
रा। आदिः कार्यंत मनः सोम्याः कलाः षोडश कीर्तिताः। अमृता मानदा श्च पुष्टि स्तुष्टिः प्री
तिर्महेश्वरि। रेवती ड्स्लतो देवि श्रीः कांतिश्च स्वधा ततः। ज्योत्स्ना हैमवती चैव छाया
संहारिणी तथा। वामा मामी कनानी च नामान्येतानि वल्लभे इति। स्वात्मना स्वस्वरूपे
ण व्यक्षुषेव्या प्राप्ति। सर्वमिदं क्रियाशक्ति मज्जमितं चिदंवरे वपाति लंजपरएवे
त्यर्थः। कोऽर्थः॥ तत्सामान्यविशेष भेदः कलनामंधंकरी मादरादाधायातरुं चितं
कतियशादद्वैतमास्वादयत्। आनंदामृतसिंधु बधुश्च यौत सूरतूराह तद्वैतः श्री
गुरुपादुकार्चनविधावाघः सयो। मीभवेदिति लजिता चर्चिला सेमडुकरी त्या।

पंचभूतात्म   ष्या षट्त्रिंशत्कलात्मकविश्वसत्तायाबिंबत्रयमयतां विभावनाद्ग्नीषो
मात्मकतां विभावयेत्स्वात्मप्रबोधेन भासनया सोऽहमिति परामर्शो दृढी इत्यर्थः । अलंकारस्तु
मालादीपकं । पूर्व   पूर्वस्योत्तरोत्तरगुणावहत्वे मालादीपकं । उदात्तं च स्फुटमेव ॥ ४९ ॥
अथैकेन चित्पूजादिक्रियाकारककल्पस्थापितन्मयतां निरू[illegible]ऐपेण्याज्ञेन देवता
यात्रापि क्रियाशक्तिरूपत्वं व्यवस्थाप्यां कारावधि सच्चिते सत्तासत्त्वेपि देसामन्यतो दे
वतानामधिष्ठानतया बिंबत्रयस्य सर्वत्र निर्लीनत्वात्कस्मिन्नवाचा इति निर्णयः इत्याशंका
यामग्निमंडले सत्त्वात् अवेत्या वाइन स्यापि मानसक्रियारूपत्वात् तद्ग्रासनामप्याह ॥ चि
त्पूजेति । चीयते चित् । चित्संविदिति बुद्धेरेव पर्यायाः ववस्थामेदोकरणतीति वि

षयौ । चित्पूजादिक्रियात्मा । चिता संवित्स्या इन्द्रियज्ञानेन पूजा । पूजा नमस्याऽपचिति
रिति कोशः । सा च वक्ष्यमाणायद्विषयायमुपन्यासः । तथा चोपक्रान्ततर्यजनस्य आह्नि
यपाक्रियास्फुरत्तालक्षणात्मा स्वभावः आत्मा आप्नोतेर्वेति श्रुतिचोदितो व्यापकता
लक्षण । आत्मा देहे धृतौ जीवे स्वभावे परमात्मनीति कोशः । आदिक्रियास्वभावन इत्यर्थः ।
ननु क्रियायाः स्त्रीलिंगत्वेनान्यस्य चात्र पुल्लिंगतया निर्देशादनुपपन्नोऽन्विषय इति चे
त् । न स्यात् एमा च कास्कंधरश्मिविवेचनेऽस्याः पुरुषतथोपपत्तिरत एवाह चात्मा गुरुक
थितमहागुरुरमूर्त्तिरिति । यस्मिन्स्पष्टे स्थितिध्वंसपिधानानुग्रहात्मकं प्रकाशते पंच
तत्त्वसगुरुः श्रीमहेश्वर इति कादिमतपरिभाषयानुभूतसूक्ष्मातिशयेन गुरुणोक

थिता। कथं वाक्यप्रबंध इत्यर्थः। महता वाक्यप्रबंधेनानुभावितेति या च ता। महारुद्रा रोदिति
मोहपंजरपतितान् पश्यन् दृष्ट्वा वा रोदयति पशुजनप्रभृत्य परिपंथिनो नुग्रहेणेति रुद्रा। अ
त्र श्रुतिः। सो रोदीद्यद्रोदीत्तदस्य रुद्रत्वमिति। रोदेर्णिलुक् चेति रक्। रुद्र। अजादित्वाट्टा
पि रुद्रा। पुंयोगे तु इन्द्र भव शर्व रुद्र इत्यादिना रुद्राणी स्यात्तथा पुंयोगस्कन संभवतीति मु
निनैवं प्रयुक्तमिदमपपस्याः पुंल्लिंगता द्रढयति। महती चासौ रुद्रा च महारुद्रा। आन्महतः
समानाधिकरणजातीययोरित्यात्वं। अत एव रौद्री त्यत्रापि रुद्र एव रौद्रीति स्वार्थिको
ण्। टिड्ढाणञेत्यादिनैवं ङीप् न पुंयोगस्तत्रापि निरुक्तप्रत्ययप्रसंगादिति दिक्। मूर्त्ति
मूर्त्तिः। स्त्रियां मूर्त्तिस्तनुस्तनूरिति कोशः। तादृशा मूर्त्तिर्यस्य तथोक्तः। संप्रदायाधिगता

तिशायित रौद्रदेह इत्यर्थः। यद्वा। विद्यापरत्वेन तंत्रसिद्धांत प्रत्ययानुरोधपरिणतमहीका
लतारेश्वरप्रचंडोग्रशूलपाणि परेश्वर प्रभृति तंत्र महारुद्रमूर्त्तिर्यस्येत्यर्थः। आलीयैः।
स्वकीयैः। अश्नुवते व्याप्तिं कुर्वंत्यंशवः किरणास्तैः। देवाः। दीव्यंति स्वाहास्कृति लयादिपर
देवनैरिति देवास्तैरधिगतानुभूताविषयाश्चार्थाः शब्दादयस्तएवाज्यं अंजनीयमाज्यं घृतं।
हविरित्यर्थः। शब्दाख्यं मातृकारूपं तस्याखिलवाचकाद्विश्वस्य चेदृचिह्नेन विवक्षित
त्वात्। तस्य आहुतयः। रश्मिरूपतंत्रकरणोपनीतरश्मिरूपतत्तत्। पदार्थैस्तैरश्मिरू
पाविषया रश्मिरूपैराधिदैविकैः स्वीकृता इत्यर्थः। यनतथोक्तः। अत्राज्यशब्दः सामा
न्यतो हविश्चिह्नेन लक्षितः। तदुक्तं ज्ञानार्णवे। अक्षराणि घृतात्वेनानिःशब्दब्रह्मराशयः।

शाब्दात्स्वं मात्रकारूपमक्षवर्णैर्विराजितं। कल्पान्कल्पे पापपुण्यसंकल्पकविकल्पकौ। धर्माधर्मौ
साधकेनेह विद्वेन प्रकल्पयेदिति। नन्वेवं मात्रकात्वाच्यस्येह विषयाप्रकल्पते तं ह्यासुराः
पापनाविध्यंस्तेनोभयंजिघ्रति सुगंधि दुर्गंधि चेति छांदोग्यश्रुतौ तमभिद्रुत्य पाप्मनाविध्यं
स्तयः पाप्मा पदेवेदमप्रतिरूपं पश्यतीत्यादि वाजसनेयिश्रुतावुक्तत्वादैनासुरादिविप्र
तिपत्याभेदः प्रह्लादो वा श्रवचित्वस्तुसंपर्कादेदेवत्वमित्याशंक्याह। निर्विकल्पस्य पूर्वोक्तावि
तिरे। इदं देवमिदमासुरमिति इदं श्रुयच्च कामसुरवं लोके ईतः षोडशी कलामिति। चोदमश्रुची
तिरूपाद्वाविकल्पान्निष्क्रांतः। नहि निर्विकल्पस्य पूर्वोक्ताविततशंकाशक्यमिति भावः। नचैवं
त्वया गुरुतोधिगतं चेत्तदीयोयं संप्रदायो नान्यैरभ्युपेयइति चेत्तत्र। आब्रह्मपातावधि मत्ता

योगिभ्यु त्वोयमखिलनिगमागमप्रतिपादितोऽउरपलपोर्थइत्याह। निष्कामैरित्यादि
नानि ष्कामैः। कामोभिलाषस्तर्षः स्यादिति कोशः। कामेभ्योऽइदं मेस्यादिदं मेभूयादित
रूपेभ्योऽभिभाषेभ्योनिष्क्रांतैरित्यर्थः। यामिमां पुष्पितां वाचं प्रवदंतिमनिषिलः। अस्व
र्यवादनिरतानान्यदस्तीतिवादिनः। कामात्मानेस्त्रोगपराभोगैश्वर्यगतिं प्रादाविति
भगवद्वाक्यपरिकलनयोपरताभिलाषोऽडकैरिति भावः। नन्वकामानां प्रवृत्तिनि
मित्ताभावान्नयजनसंभवइत्याह। आत्माति। आत्मनिसकलश्रुतिनिर्णीतकामोऽ
भिलाषोयेषांतथोक्तैः। विरतैर्हि कतर्षतया त्मलाभयोग्यैरित्यर्थः। अत्र वाजसनेयि
श्रुतिः। एतद्धस्मवैतत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयंते किं प्रजया करि

ष्यामो एषां नोयमात्मा नायं लोक इति तह स्म पुत्रैषणायाश्च वित्तैषणायाश्च युलोकै

षणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति। अतएवांतरैर्विद्वद्भिरैरिति। तद्रिसादइति

धातोः तदृतिसीदंत्यस्मान्निंद्रियाणि तंद्रा। टाबंतः। कोशे तु तंद्रप्रमीलेत्यपि। नास्ति

तंद्रा विरतिरूपा निद्रा येषां तथोक्तैः। अजस्रमंतर्मुखप्रवृत्तैरित्यर्थः। नहि तेऽविद्व

द्भिः। किंतु विद्वद्भिरैः। विदंत्यतींद्रियमर्थं विद्वांसस्तेषामपि इराः। परमैश्वर्यवंतः पर

मैश्वर्यं हि तेषां तत्तद्बुद्ध्याय प्रवर्त्तनलक्षणं साम्राज्यं। अतएव देवभट्टारकेत्यादय

आचार्याणां पारिभाषिक्यः संज्ञाः। ते च यथा कौपीतविब्रह्मणे प्रतर्द्दनो निर्भुजव

क्राश्वसेवमदयः। उपचितयजनः। उपचितां शिष्योपशिष्यद्वारा संप्रदाणेन वर्धो

पितं यजनं यस्यात्र धावधि प्रवर्त्तितां तमखव इत्यर्थः। तथोक्तं। अतएव श्रीविभो इति। त

नदधिष्ठातृतयाश्वाने त्यर्थः। तथोक्तस्त्वं। ब्रह्मविद्यापरिणतमतिभिः ब्रह्म

णोऽहंहणात्मकस्य